सूत उवाच ॥ अथातः संप्रवक्ष्यामि शुद्धं कैवल्यमुक्तिदम् ॥
अनुग्रहान्महेशस्य भवदुःखस्य भेषजम् ॥ १ ॥
न कर्मणामनुष्ठानैर्न दानैस्तपसापि वा ॥
कैवल्यं लभते मर्त्यः किंतु ज्ञानेन केवलम् ॥ २ ॥
रामाय दण्डकारण्ये पार्वतीपतिना पुरा ॥
या प्रोक्ता शिवगीताख्या गुह्याद्गुह्यतमा हि सा ॥ ३ ॥
यस्याः श्रवणमात्रेण नृणां मुक्तिर्ध्रुवं भवेत् ॥
पुरा सनत्कुमाराय स्कन्देनाभिहिता हि सा ॥ ४ ॥
सनत्कुमारः प्रोवाच व्यासाय मुनिसत्तमाः ॥
मह्यं कृपातिरेकेण प्रददौ बादरायणः ॥ ५ ॥
उक्तं च तेन कस्मैचिन्न दातव्यमिदं त्वया ॥
सूतपुत्रान्यथा देवाः क्षुभ्यन्ति च शपन्ति च ॥ ६ ॥
अथ पृष्टो मया विप्रा भगवान्बादरायणः ॥
भगवन्देवताः सर्वाः किं क्षुभ्यन्ति शपन्ति च ॥ ७ ॥
तासामत्रास्ति का हानिर्यया कुप्यन्ति देवताः ॥
पाराशर्योऽथ मामाह यत्पृष्टं शृणु वत्स तत् ॥ ८ ॥
नित्याग्निहोत्रिणो विप्राः संति ये गृहमेधिनः ॥
त एव सर्वफलदाः सुराणां कामधेनवः ॥ ९ ॥
भक्ष्यं भोज्यं च पेयं च यद्यदिष्टं सुपर्वणाम् ॥
अग्नौ हुतेन हविषा सत्सर्वं लभ्यते दिवि ॥ १० ॥
नान्यदास्ति सुरेशानामिष्टसिद्धिप्रदं दिवि ॥
दोग्ध्री धेनुर्यथा नीता दुःखदा गृहमेधिनाम् ॥ ११ ॥
तथैव ज्ञानवान्विप्रो देवानां दुःखदो भवेत् ॥
त्रिदशास्तेन विघ्नन्ति प्रविष्टा विषयं नृणाम् ॥ १२ ॥
ततो न जायते भक्तिः शिवे कस्यापि देहिनः ॥
तस्मादविदुषां नैव जायते शूलपाणिनः ॥ १३ ॥

यथाकथंचिज्जातापि मध्ये विच्छिद्यते नृणाम् ॥
जातं वापि शिवज्ञानं न विश्वासं भजत्यलम् ॥ १४
ऋषय ऊचुः ॥ यद्येवं देवता विघ्नमाचरन्ति तनूभृताम् ॥
पौरुषं तत्र कस्यास्ति येन मुक्तिर्भविष्यति ॥ १५ ॥
सत्यं सूतात्मज ब्रूहि तत्रोपायोऽस्ति वा न वा ॥
सूत उवाच ॥ कोटिजन्मार्जितैः पुण्यैः शिवे भक्तिः प्रजायते १६
इष्टापूर्तादिकर्माणि तेनाचरति मानवः ॥
शिवार्पणधिया कामान्परित्यज्य यथाविधि ॥ १७ ॥
अनुग्रहात्तेन शंभोर्जायते सुदृढो नरः ॥
ततो भीताः पलायन्ते विघ्नं हित्वा सुरेश्वराः ॥ १८ ॥
जायते तेन शुश्रूषा चरिते चन्द्रमौलिनः ॥
शृण्वतो जायते ज्ञानं ज्ञानादेव विमुच्यते ॥ १९ ॥
बहुनात्र किमुक्तेन यस्य भक्तिः शिवे दृढा ॥
महापापोपपापौघकोटिग्रस्तोऽपि मुच्यते ॥ २० ॥
अनादरेण शाठ्येन परिहासेन मायया ॥
शिवभक्तिरतश्चेत्स्यादन्त्यजोऽपि विमुच्यते ॥ २१ ॥
एवं भक्तिश्च सर्वेषां सर्वदा सर्वतोमुखी ॥
तस्यां तु विद्यमानायां यस्तु मर्त्यो न मुच्यते ॥ २२ ॥
संसारबन्धनात्तस्मादन्यः को वास्ति मूढधीः ॥
नियमाद्यस्तु कुर्वीत भक्तिं वा द्रोहमेव वा ॥ २३ ॥
तस्यापि चेत्प्रसन्नोऽसौ फलं यच्छति वाञ्छितम् ॥
ऋद्धं किंचित्समादाय क्षुल्लकं जलमेव वा ॥ २४ ॥
यो दत्ते नियमेनासौ तस्मै दत्ते जगत्त्रयम् ॥
तत्राप्यशक्तो नियमान्नमस्कारं प्रदक्षिणाम् ॥ २५ ॥
यः करोति महेशस्य तस्मै तुष्टो भवेच्छिवः ॥
प्रदक्षिणास्वशक्तोऽपि यः स्वांते चिन्तयेच्छिवम् ॥२६॥

गच्छन्समुपविष्टो वा तस्याभीष्टं प्रयच्छति ॥
चन्दनं बिल्वकाष्ठस्य पुष्पाणि वनजान्यपि ॥ २७ ॥
फलानि तादृशान्येव यस्य प्रीतिकराणि वै ॥
दुष्करं तस्य सेवायां किमास्ति भुवनत्रये ॥ २८ ॥
वन्येषु यादृशी प्रीतिर्वर्तते परमेशितुः ॥
उत्तमेष्वपि नास्त्येव तादृशी ग्रामजेष्वपि ॥ २९ ॥
तं त्यक्त्वा तादृशं देवं यः सेवेतान्यदेवताम् ॥
स हि भागीरथीं त्यक्त्वा काङ्क्षते मृगतृष्णिकाम् ॥३०॥
किंतु यस्यास्ति दुरितं कोटिजन्मसु संचितम् ॥
तस्य प्रकाशते नायमर्थो मोहान्धचेतसः ॥ ३१ ॥
न कालनियमो यत्र न देशस्य स्थलस्य च ॥
यत्रास्य चित्तं रमते तस्य ध्यानेन केवलम् ॥ ३२ ॥
आत्मत्वेन शिवस्यासौ शिवसायुज्यमाप्नुयात् ॥
अतिस्वल्पतरायुः श्रीर्भूतेशांशाधिपोऽपि यः ॥ ३३ ॥
स तु राजाहमस्मीति वादिनं हन्ति सान्वयम् ॥
कर्तापि सर्वलोकानामक्षयैश्वर्यवानपि ॥ ३४ ॥
शिवः शिवोऽहमस्मीति वादिनं यं च कञ्चन ॥
आत्मना सह तादात्म्यभागिनं कुरुते भृशम् ॥ ३५ ॥
धर्मार्थकाममोक्षाणां पारं यस्याथ येन वै ॥
मुनयस्तत्प्रवक्ष्यामि व्रतं पाशुपताभिधम् ॥ ३६ ॥
कृत्वा तु विरजां दीक्षां भूतिरुद्राक्षधारिणः ॥
जपन्तो वेदसाराख्यं शिवनामसहस्रकम् ॥ ३७ ॥
संत्यज्य तेन मर्त्यत्वं शैवीं तनुमवाप्स्यथ ॥
ततः प्रसन्नो भगवाञ्छंकरो लोकशंकरः ॥ ३८ ॥
भवतां दृश्यतामेत्य कैवल्यं वः प्रदास्यति ॥
रामाय दण्डकारण्ये यत्प्रादात्कुम्भसंभवः ॥ ३९ ॥

तत्सर्वं वः प्रवक्ष्यामि शृणुध्वं भक्तियोगिनः ॥ ४० ॥

इति श्रीपद्मपुराणे उपरिभागे शिवगीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे शिवराघवसंवादे शिवभक्त्युत्कर्षनिरूपणं नाम प्रथमोऽध्यायः ॥ १ ॥

ऋषय ऊचुः ॥ किमर्थमागतोऽगस्त्यो रामचन्द्रस्य सन्निधिम् ॥
कथं वा विरजां दीक्षां कारयामास राघवम् ॥
ततः किमाप्तवान् रामः फलं तद्वक्तुमर्हसि ॥ १ ॥
सूत उवाच ॥ रावणेन यदा सीताऽपहृता जनकात्मजा ॥
तदा वियोगदुःखेन विलपन्नास राघवः ॥ २ ॥
निर्निद्रो निरहंकारो निराहारो दिवानिशम् ॥
मोक्तुमैच्छत्ततः प्राणान्सानुजो रघुनन्दनः ॥ ३ ॥
लोपामुद्रापतिर्ज्ञात्वा तस्य सन्निधिमागमत् ॥
अथ तं बोधयामास संसारासारतां मुनिः ॥ ४ ॥
अगस्त्य उवाच । किं विषीदसि राजेन्द्र कान्ता कस्य विचार्यताम्
जडः किं नु विजानाति देहोऽयं पाञ्चभौतिकः ॥ ५ ॥
निर्लेपः परिपूर्णश्च सच्चिदानन्दविग्रहः ॥
आत्मा न जायते नैव म्रियते न च दुःखभाक् ॥ ६ ॥
सूर्योऽसौ सर्वलोकस्य चक्षुष्ट्वेन व्यवस्थितः ॥
तथापि चाक्षुषैर्दोषैर्न कदाचिद्विलिप्यते ॥ ७ ॥
सर्वभूतान्तरात्मापि तद्वद्दृश्यैर्न लिप्यते ॥
देहोऽपि मलपिण्डोऽयं मुक्तजीवो जडात्मकः ॥ ८ ॥
दह्यते वह्निना काष्ठैः शिवाद्यैर्भक्ष्यतेऽपि वा ॥
तथापि नैव जानाति विरहे तस्य का व्यथा ॥ ९ ॥
सुवर्णगौरी दूर्वाया दलवच्छ्यामलापि वा ॥
पीनोत्तुङ्गस्तनाभोगभुग्नसूक्ष्मवलग्निका ॥ १० ॥
बृहन्नितम्बजघना रक्तपादसरोरुहा ॥
राकाचन्द्रमुखी बिम्बप्रतिबिम्बरदच्छदा ॥ ११ ॥

नीलेन्दीवरनीकाशनयनद्वयशोभिता ॥
मत्तकोकिलसँल्लापा मत्तद्विरदगामिनी ॥ १२ ॥
कटाक्षैरनुगृह्णाति मां पञ्चेषुशरोत्तमैः ॥
इति यां मन्यते मूढ स तु पञ्चेषुशासितः ॥ १३ ॥
तस्याविवेकं वक्ष्यामि शृणुष्वावहितो नृप ॥
न च स्त्री न पुमानेष नैव चायं नपुंसकः ॥ १४ ॥
अमूर्तः पुरुषः पूर्णो द्रष्टा देही स जीविनः ॥
या तन्वङ्गी मृदुर्बाला मलपिण्डात्मिका जडा ॥ १५ ॥
सा न पश्यति यत्किंचिन्न शृणोति न जिघ्रति ॥
चर्ममात्रा तनुस्तस्या बुद्ध्वा त्यक्षस्व राघव ॥ १६ ॥
या प्राणादधिका सैव हंत ते स्याद्घृणास्पदम् ॥
जायन्ते यदि भूतेभ्यो देहिनः पाञ्चभौतिकाः ॥ १७ ॥
आत्मा यदेकलस्तेषु परिपूर्णः सनातनः ॥
का कान्ता तत्र कः कान्तः सर्व एव सहोदराः ॥१८॥
निर्मितायां गृहावल्यां तदवच्छिन्नतां गतम् ॥
नभस्तस्यां तु दग्धायां न कांचित्क्षतिमृच्छति ॥ १९ ॥
तद्वदात्मापि देहेषु परिपूर्णः सनातनः ॥
हन्यमानेषु तेष्वेव स स्वयं नैव हन्यते ॥ २० ॥
हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम् ॥
तावुभौ न विजानीतो नायं हन्ति न हन्यते ॥ २१ ॥
अस्मान्नृपातिदुःखेन किं खेदस्यास्ति कारणम् ॥
स्वस्वरूपं विदित्वेदं दुःखं त्यक्त्वा सुखी भव ॥ २२ ॥

राम उवाच ॥ मुने देहस्य नो दुःखं नैव चेत्परमात्मनः ॥
सीतावियोगदुःखाग्निर्मां भस्मीकुरुते कथम् ॥ २३ ॥
सदाऽनुभूयते योऽर्थः स नास्तीति त्वयेरितः ॥
जायतां तत्र विश्वासः कथं मे मुनिपुङ्गव ॥ २४ ॥

अन्योऽत्र नास्ति को भोक्ता येन जन्तुः प्रतप्यते ॥
सुखस्य वापि दुःखस्य तद्ब्रूहि मुनिसत्तम ॥ २५ ॥
अगस्त्य उवाच ॥ दुर्ज्ञेया शांभवी माया तया संमोह्यते जगत् ॥
मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ॥ २६ ॥
तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत् ॥
सत्यज्ञानात्मकोऽनन्तो विभुरात्मा महेश्वरः ॥ २७ ॥
तस्यैवांशो जीवलोके हृदये प्राणिनां स्थितः ॥
विस्फुलिङ्गा यथा वह्नेर्जायन्ते काष्ठयोगतः ॥ २८ ॥
अनादिकर्मसंबद्धास्तद्वदंशा महेशितुः ॥
अनादिवासनायुक्ताः क्षेत्रज्ञा इति ते स्मृताः ॥ २९ ॥
मनो बुद्धिरहंकारश्चित्तं चेति चतुष्टयम् ॥
अन्तःकरणमित्याहुस्तत्र ते प्रतिबिम्बिताः ॥ ३० ॥
जीवत्वं प्राप्नुयुः कर्मफलभोक्तार एव ते ॥
ततो वैषयिकं तेषां सुखं वा दुःखमेव वा ॥ ३१ ॥
त एव भुञ्जते भोगायतनेऽस्मिन् शरीरके ॥
स्थावरं जङ्गमं चेति द्विविधं वपुरुच्यते ॥ ३२ ॥
स्थावरास्तत्र देहाः स्युः सूक्ष्मा गुल्मलतादयः ॥
अण्डजाः स्वेदजास्तद्वदुद्भिज्जा इति जङ्गमाः ॥ ३३ ॥
योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः ॥
स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतम् ॥ ३४ ॥
सुख्यहं दुःख्यहं चेति जीव एवाभिमन्यते ॥
निर्लेपोऽपि परं ज्योतिर्मोहितः शंभुमायया ॥ ३५ ॥
कामः क्रोधस्तथा लोभो मदो मात्सर्यमेव च ॥
मोहश्चेत्यरिषड्वर्गमहंकारगतं विदुः ॥ ३६ ॥
स एव बध्यते जीवः स्वप्नजाग्रदवस्थयोः ॥
सुषुप्तौ तदभावाच्च जीवः शंकरतां गतः ॥ ३७ ॥

स एव मायासंस्पृष्टः कारणं सुखदुःखयोः ॥
शुक्तौ रजतवद्विश्वं मायया दृश्यते शिवे ॥ ३८ ॥
ततो विवेकज्ञानेन न कोऽप्यत्रास्ति दुःखभाक् ॥
ततो विरम दुःखात्त्वं किं मुधा परितप्यसे ॥ ३९ ॥
श्रीराम उवाच ॥ मुने सर्वमिदं तथ्यं यन्मदग्रे त्वयेरितम् ॥
तथापि न जहात्येतत्प्रारब्धादृष्टमुल्बणम् ॥ ४० ॥
मत्तं कुर्याद्यथा मद्यं नष्टाविद्यमपि द्विजम् ॥
तद्वत्प्रारब्धभोगोऽपि न जहाति विवेकिनम् ॥ ४१ ॥
ततः किं बहुनोक्तेन प्रारब्धसचिवः स्मरः ॥
बाधते मां दिवारात्रमहंकारोऽपि तादृशः ॥ ४२ ॥
अत्यन्तपीडितो जीवः स्थूलदेहं विमुञ्चति ॥
तस्माज्जीवाशये मह्यमुपायः क्रियतां द्विज ॥ ४३ ॥

इति श्रीशिवगीतासु० वैराग्योपदेशो नाम द्वितीयोऽध्यायः ॥ २ ॥

अगस्त्य उवाच ॥ न गृह्णाति वचः पथ्यं कामक्रोधादिपीडितः ॥
हितं न रोचते तस्य मुमूर्षोरिव भेषजम् ॥ १ ॥
मध्येसमुद्रं या नीता सीता दैत्येन मायिना ॥
आयास्यति नरश्रेष्ठ सा कथं तव संनिधिम् ॥ २ ॥
बध्यन्ते देवताः सर्वा द्वारि मर्कटयूथवत् ॥
किं च चामरधारिण्यो यस्य संति सुराङ्गनाः ॥ ३ ॥
भुङ्क्ते त्रिलोकीमखिलां यः शंभुवरदर्पितः ॥
निष्कण्टकं तस्य जयः कथं तव भविष्यति ॥ ४ ॥
इन्द्रजिन्नाम पुत्रो यस्तस्यास्तीशवरोद्धतः ॥
तस्याग्रे संगरे देवा बहुवारं पलायिताः ॥ ५ ॥
कुम्भकर्णाह्वयो भ्राता यस्यास्ति सुरसूदनः ॥
अन्यो दिव्यास्त्रसंयुक्तश्चिरजीवी बिभीषणः ॥ ६ ॥

दुर्गं यस्यास्ति लंकाख्यं दुर्जेयं देवदानवैः ॥
चतुरङ्गबलं यस्य वर्तते कोटिसंख्यया ॥ ७ ॥
एकाकिना त्वया जेयः स कथं नृपनन्दन ॥
आकांक्षते करे धर्तुं बालश्चन्द्रमसं यथा ॥
तथा त्वं काममोहेन जयं तस्याभिवाञ्छसि ॥ ८ ॥
श्रीराम उवाच ॥ क्षत्रियोऽहं मुनिश्रेष्ठ भार्या मे रक्षसा हृता ॥
यदि तं न निहन्म्याशु जीवने मेऽस्ति किं फलम् ॥ ९ ॥
अतस्ते तत्त्वबोधेन न मे किंचित्प्रयोजनम् ॥
कामक्रोधादयः सर्वे दहन्त्येते तनुं मम ॥ १० ॥
अहंकारोऽपि मे नित्यं जीवनं हन्तुमुद्यतः ॥
हृतायां निजकान्तायां शत्रुणाऽवमतस्य वा ॥ ११ ॥
यस्य तत्त्वबुभुत्सा स्यात्स लोके पुरुषाधमः ॥
तस्मात्तस्य वधोपायं लङ्घयित्वाम्बुधिं रणे ॥
ब्रूहि मे मुनिशार्दूल त्वत्तो नान्योऽस्ति मे गुरुः ॥१२॥
अगस्त्य उवाच ॥ एवं चेच्छरणं याहि पार्वतीपतिमव्ययम् ॥
स चेत्प्रसन्नो भगवान्वाञ्छितार्थं प्रदास्यति ॥१३॥
देवैरजेयः शक्राद्यैर्हरिणा ब्रह्मणापि वा ॥
स ते वध्यः कथं वा स्याच्छंकरानुग्रहं विना ॥१४॥
अतस्त्वां दीक्षयिष्यामि विरजामार्गमाश्रितः ॥
तेन मार्गेन मर्त्यत्वं हित्वा तेजोमयो भव ॥ १५ ॥
येन हत्वा रणे शत्रून्सर्वान्कामानवाप्स्यसि ॥
भुक्त्वा भूमण्डले चान्ते शिवसायुज्यमाप्स्यसि ॥१६॥
सूत उवाच ॥ अथ प्रणम्य रामस्तं दण्डवन्मुनिसत्तमम् ॥
उवाच दुःखनिर्मुक्तः प्रहृष्टेनान्तरात्मना ॥ १७ ॥
श्रीराम उवाच ॥ कृतार्थोऽहं मुने जातो वाञ्छितार्थो ममागतः
पीताम्बुधिः प्रसन्नस्त्वं यदि मे किमु दुर्लभम् ॥

अतस्त्वं विरजां दीक्षां ब्रूहि मे मुनिसत्तम ॥ १८ ॥
अगस्त्य उवाच ॥ शुक्लपक्षे चतुर्दश्यामष्टम्यां वा विशेषतः ॥
एकादश्यां सोमवारे आर्द्रायां वा समारभेत् ॥ १९ ॥
यं वायुमाहुर्यं रुद्रं यमग्निं परमेश्वरम् ॥
परात्परतरं चाहुः परात्परतरं शिवम् ॥ २० ॥
ब्रह्मणो जनकं विष्णोर्वह्नेर्वायोः सदाशिवम् ॥
ध्यात्वाग्निनाऽवसथ्याग्निं विशोध्य च पृथक्पृथक्॥२१॥
पञ्चभूतानि संयम्य ध्यात्वा गुणविधिक्रमात् ॥
मात्राः पञ्च चतस्रश्च त्रिमात्रादिस्ततः परम् ॥ २२ ॥
एकमात्रममात्रं हि द्वादशान्तं व्यवस्थितम् ॥
स्थित्यां स्थाप्यामृतो भूत्वा व्रतं पाशुपतं चरेत् ॥२३॥
इदं व्रतं पाशुपतं करिष्यामि समासतः ॥
प्रातरेवं तु संकल्प्य निधायाग्निं स्वशाखया ॥ २४ ॥
उपोषितः शुचिः स्नातः शुक्लाम्बरधरः स्वयम् ॥
शुक्लयज्ञोपवीतश्च शुक्लमाल्यानुलेपनः ॥ २५ ॥
जुहुयाद्विरजामंत्रैः प्राणापानादिभिस्ततः ॥
अनुवाकान्तमेकाग्रः समिदाज्यचरून्पृथक् ॥ २६ ॥
आत्मन्यग्निं समारोप्य याते अग्नेति मंत्रतः ॥
भस्मादायाग्निरित्याद्यैर्विमृज्याङ्गानि संस्पृशेत् ॥ २७ ॥
भस्मच्छन्नो भवेद्विद्वान्महापातकसंभवैः ॥
पापैर्विमुच्यते सत्यं मुच्यते च न संशयः ॥ २८ ॥
वीर्यमग्नेर्यतो भस्म वीर्यवान्भस्मसंयुतः ॥
भस्मस्नानरतो विप्रो भस्मशायी जितेन्द्रियः ॥ २९ ॥
सर्वपापविनिर्मुक्तः शिवसायुज्यमाप्नुयात् ॥
एवं कुरु महाभाग शिवनामसहस्रकम् ॥ ३० ॥
इदं तु संप्रदास्यामि तेन सर्वार्थमाप्स्यसि ॥

सुत उवाच ॥ इत्युक्त्वा प्रददौ तस्मै शिवनामसहस्रकम् ॥ ३१ ॥
वेदसाराभिधं नित्यं शिवप्रत्यक्षकारकम् ॥
उक्तं च तेन राम त्वं जप नित्यं दिवानिशम् ॥ ३२ ॥
ततः प्रसन्नो भगवान्महापाशुपतास्त्रकम् ॥
तुभ्यं दास्यति तेन त्वं शत्रून्हत्वाऽऽप्स्यसि प्रियाम्॥३३॥
तस्यैवास्त्रस्य माहात्म्यात्समुद्रं शोषयिष्यसि ॥
संहारकाले जगतामस्त्रं तत्पार्वतीपतेः ॥ ३४ ॥
तदलाभे दानवानां जयस्तव सुदुर्लभः ॥
तस्माल्लब्धं तदेवास्त्रं शरणं याहि शंकरम् ॥ ३५ ॥

इति श्रीपद्मपुराणे शिवगीतासु० विरजादीक्षानिरूपणं नाम तृतीयोऽध्यायः॥३॥

सूत उवाच ॥ एवमुक्त्वा मुनिश्रेष्ठ गते तस्मिन्निजाश्रमम् ॥
अथ रामगिरौ रामस्तस्मिन्गोदावरीतटे ॥ १ ॥
शिवलिङ्गं प्रतिष्ठाप्य कृत्वा दीक्षां यथाविधि ॥
भूतिभूषितसर्वाङ्गो रुद्राक्षाभरणैर्युतः ॥ २ ॥
अभिषिच्य जलैः पुण्यैर्गौतमीसिन्धुसंभवैः ॥
अर्चयित्वा वन्यपुष्पैस्तद्वद्वन्यफलैरपि ॥ ३ ॥
भस्मच्छन्नो भस्मशायी व्याघ्रचर्मासने स्थितः ॥
नाम्नां सहस्रं प्रजपन्नक्तंदिवमनन्यधीः ॥ ४ ॥
मासमेकं फलाहारो मासं पर्णाशनः स्थितः ॥
मासमेकं जलाहारो मासं च पवनाशनः ॥ ५ ॥
शान्तो दान्तः प्रसन्नात्मा ध्यायन्नेवं महेश्वरम् ॥
हृत्पङ्कजे समासीनमुमादेहार्धधारिणम् ॥ ६ ॥
चतुर्भुजं त्रिनयनं विद्युत्पिङ्गजटाधरम् ॥
कोटिसूर्यप्रतीकाशं चन्द्रकोटिसुशीतलम् ॥ ७ ॥
सर्वाभरणसंयुक्तं नागयज्ञोपवीतिनम् ॥

व्याघ्रचर्माम्बरधरं वरदाभयधारिणम् ॥ ८ ॥
व्याघ्रचर्मोत्तरीयं च सुरासुरनमस्कृतम् ॥
पञ्चवक्त्रं चन्द्रमौलिं त्रिशूलडमरूधरम् ॥ ९ ॥
नित्यं च शाश्वतं शुद्धं ध्रुवमक्षरमव्ययम् ॥
एवं नित्यं प्रजपतो गतं मासचतुष्टयम् ॥ १० ॥
अथ जातो महानादः प्रलयाम्बुदभीषणः ॥
समुद्रमथनोद्भूतमन्दरावनिभृद्ध्वनिः ॥ ११ ॥
रुद्रबाणाग्निसंदीप्तभ्रश्यत्त्रिपुरविभ्रमः ॥
तमाकर्ण्याथ संभ्रान्तो यावत्पश्यति पुष्करम् ॥ १२ ॥
तावदेव महातेजो समस्यासीत्पुरो द्विजाः ॥
तेजसा तेन संभ्रान्तो नापश्यत्स दिशो दश ॥ १३ ॥
अन्धीकृतेक्षणस्तूर्णं मोहं यातो नृपात्मजः ॥
विचिन्त्य तर्कयामास दैत्यमायां द्विजेश्वराः ॥ १४ ॥
अथोत्थाय महावीरः सज्जं कृत्वा स्वकं धनुः ॥
अविध्यन्निशितैर्बाणैर्दिव्यास्त्रैरभिमन्त्रितैः ॥ १५ ॥
आग्नेयं वारुणं सौम्यं मोहनं सौरपार्वतम् ॥
विष्णुचक्रं महाचक्रं कालचक्रं च वैष्णवम् ॥ १६ ॥
रौद्रं पाशुपतं ब्राह्मं कौबेरं कुलिशानिलम् ॥
भार्गवादिबहून्यस्त्राण्ययं प्रायुङ्क्त राघवः ॥ १७ ॥
तस्मिंस्तेजसि शस्त्राणि चास्त्राण्यस्य महीपतेः ॥
विलीनानि महाभ्रस्य करका इव नीरधौ ॥ १८ ॥
ततः क्षणेन जज्वाल धनुस्तस्य कराच्च्युतम् ॥
तूणीरं चाङ्गुलित्राणं गोधिकापि महीपते ॥ १९ ॥
तद्दृष्ट्वा लक्ष्मणो भीतः पपात भुवि मूर्च्छितः॥
अथाकिञ्चित्करो रामो जानुभ्यामवनिं गतः ॥ २० ॥
मीलिताक्षो भयाविष्टः शंकरं शरणं गतः ॥

स्वरेणाप्युच्चरन्नुच्चैः शंभोर्नामसहस्रकम् ॥ २१ ॥
शिवं च दण्डवद्भूमौ प्रणनाम पुनः पुनः ॥
पुनश्च पूर्ववच्चासीच्छब्दो दिङ्मण्डलं ग्रसन् ॥ २२ ॥
चचाल वसुधा घोरं पर्वताश्च चकम्पिरे ॥
ततः क्षणेन शीतांशुशीतलं तेज आपतत् ॥ २३ ॥
उन्मीलिताक्षो रामस्तु यावदेतत्प्रपश्यति ॥
तावद्ददर्श वृषभं सर्वालंकारसंयुतम् ॥ २४ ॥
पीयूषमथनोद्भूतनवनीतस्य पिण्डवत् ॥
प्रोतस्वर्णं मरकतच्छायशृङ्गद्वयान्वितम् ॥ २५ ॥
नीलरत्नेक्षणं ह्रस्वकण्ठकम्बलभूषितम् ॥
रत्नपल्याणसंयुक्तं निबद्धं श्वेतचामरैः ॥ २६ ॥
घण्टिकाघर्घरीशब्दैः पूरयन्तं दिशो दश ॥
तत्रासीनं महादेवं शुद्धस्फटिकविग्रहम् ॥ २७ ॥
कोटिसूर्यप्रतीकाशं कोटिशीतांशुशीतलम् ॥
व्याघ्रचर्माम्बरधरं नागयज्ञोपवीतिनम् ॥ २८ ॥
सर्वालंकारसंयुक्तं विद्युत्पिङ्गजटाधरम् ॥
नीलकण्ठं व्याघ्रचर्मोत्तरीयं चन्द्रशेखरम् ॥ २९ ॥
नानाविधायुधोद्भासिदशबाहुं त्रिलोचनम् ॥
युवानं पुरुषश्रेष्ठं सच्चिदानन्दविग्रहम् ॥ ३० ॥
तत्रैव च सुखासीनां पूर्णचन्द्रनिभाननाम् ॥
नीलेन्दीवरदामाभामुद्यन्मरकतप्रभाम् ॥ ३१ ॥
मुक्ताभरणसंयुक्तां रात्रिं ताराञ्चितामिव ॥
विन्ध्यक्षितिधरोत्तुङ्गकुचभारभरालसाम् ॥ ३२ ॥
सदसत्संशयाविष्टमध्यदेशान्तराम्बराम् ॥
दिव्याभरणसंयुक्तां दिव्यगन्धानुलेपनाम् ॥ ३३ ॥
दिव्यमाल्याम्बरधरां नीलेन्दीवरलोचनाम् ॥

अलकोद्भासिवदनां ताम्बूलग्रासशोभिताम् ॥ ३४ ॥
शिवालिङ्गनसंजातपुलकोद्भासिविग्रहाम् ॥
सच्चिदानन्दरूपाढ्यां जगन्मातरमम्बिकाम् ॥ ३५ ॥
सौन्दर्यसारसंदोहां ददर्श रघुनन्दनः ॥
स्वस्ववाहनसंयुक्तान्नानायुधलसत्करान् ॥ ३६ ॥
बृहद्रथन्तरादीनि सामानि परिगायतः॥
स्वस्वकान्तासमायुक्तान्दिक्पालान्परितः स्थितान्॥३७॥
अग्रगं गरुडारूढं शंखचक्रगदाधरम् ॥
कालाम्बुदप्रतीकाशं विद्युत्कान्त्या श्रिया युतम् ॥३८॥
जपन्तमेकमनसा रुद्राध्यायं जनार्दनम् ॥
पश्चाच्चतुर्मुखं देवं ब्रह्माणं हंसवाहनम् ॥ ३९ ॥
चतुर्वक्त्रैश्चतुर्वेदरुद्रसूक्तैर्महेश्वरम् ॥
स्तुवन्तं भारतीयुक्तं दीर्घकूर्चं जटाधरम् ॥ ४० ॥
अथर्वशिरसा देवं स्तुवन्तं मुनिमण्डलम् ॥
गङ्गादितटिनीयुक्तमम्बुधिं नीलविग्रहम् ॥ ४१ ॥
श्वेताश्वतरमंत्रेण स्तुवन्तं गिरिजापतिम् ॥
अनन्तादिमहानागान्कैलासगिरिसन्निभान् ॥ ४२ ॥
कैवल्योपनिषत्पाठान्मणिरत्नविभूषितान् ॥
सुवर्णवेत्रहस्ताढ्यं नन्दिनं पुरतः स्थितम् ॥ ४३ ॥
दक्षिणे मूषकारूढं गणेशं पर्वतोपमम् ॥
मयूरवाहनारूढमुत्तरे षण्मुखं तथा ॥ ४४ ॥
महाकालं च चण्डेशं पार्श्वयोर्भीषणाकृतिम् ॥
कालाग्निरुद्रं दूरस्थं ज्वलद्दावाग्निसन्निभम् ॥ ४५ ॥
त्रिपादं कुटिलाकारं नटद्भृङ्गिरिटिं पुरः ॥
नानाविकारवदनान्कोटिशः प्रमथाधिपान् ॥ ४६ ॥
नानावाहनसंयुक्तं परितो मातृमण्डलम् ॥

पञ्चाक्षरीजपासक्तान्सिद्धविद्याधरादिकान् ॥ ४७ ॥
दिव्यरुद्रकगीतानि गायत्किन्नरवृन्दकम् ॥
तत्र त्रैयम्बकं मन्त्रं जपद्द्विजकदम्बकम् ॥ ४८ ॥
गायन्तं वीणया गीतं नृत्यन्तं नारदं दिवि ॥
नृत्यतो नाट्यनृत्येन रम्भादीनप्सरोगणान् ॥ ४९ ॥
गायच्चित्ररथादीनां गन्धर्वाणां कदम्बकम् ॥
कम्बलाश्वतरौ शंभुकर्णभूषणतां गतौ ॥ ५० ॥
गायन्तौ पन्नगौ गीतं कपालं कम्बलं तथा ॥
एवं देवसभां दृष्ट्वा कृतार्थो रघुनन्दनः ॥ ५१ ॥
हर्षगद्गदया वाचा स्तुवन्देवं महेश्वरम् ॥
दिव्यनामसहस्रेण प्रणनाम पुनः पुनः ॥ ५२ ॥

इति श्रीपद्मपुराणे शिवगीतासु० शिवप्रादुर्भावाख्यश्चतुर्थोऽध्यायः ॥ ४ ॥

सत उवाच ॥ अथ प्रादुरभूत्तत्र हिरण्मयरथो महान् ॥
अनेकदिव्यरत्नांशुकिर्मीरितदिगन्तरः ॥ १ ॥
नद्युपान्तिकपङ्क्त्याढ्यमहाचक्रचतुष्टयः ॥
मुक्तातोरणसंयुक्तः श्वेतच्छत्रशतावृतः ॥ २ ॥
शुद्धहेमखलीनाढ्यतुरङ्गगणसंयुतः ॥
रुक्मावितानविलसद्दूर्ध्वदिव्यवृषध्वजः ॥ ३ ॥
मत्तवारणिकायुक्तः पट्टतल्पोपशोभितः ॥
पारिजाततरूद्भूतपुष्पमालाभिरञ्चितः ॥ ४ ॥
मृगनाभिसमुद्भूतकस्तूरिमदपङ्किलः ॥
कर्पूरागरुधूपोत्थगन्धाकृष्टमधुव्रतः ॥ ५ ॥
संवर्तघनघोषाढ्यो नानावाद्यसमन्वितः ॥
वीणावेणुस्वनासक्तकिन्नरीगणसंकुलः ॥ ६ ॥
एवं दृष्ट्वा रथश्रेष्ठं वृषादुत्तीर्य शंकरः ॥

अम्बया सहितस्तत्र पट्टलेपेऽविशत्तदा ॥ ७ ॥
नीराजनैः सुरस्त्रीणां श्वेतचामरचालनैः ॥
दिव्यव्यजनपातैश्च प्रहृष्टो नीललोहितः ॥ ८ ॥
क्वणत्कङ्कणनिध्वानैर्मञ्जुमञ्जीरसिञ्जितैः ॥
वीणावेणुस्वनैर्गीतैः पूर्णमासीज्जगत्त्रयम् ॥ ९ ॥
शुककेकिकुलारावैः श्वेतपारावतस्वनैः ॥
उन्निद्रभूषाफणिनां दर्शनादेव बर्हिणः ॥ १० ॥
ननृतुर्दर्शयन्तः स्वांश्चन्द्रकान्कोटिसंख्यया ॥
प्रणमन्तं ततो राममुत्थाप्य वृषभध्वजः ॥ ११ ॥
आनिनाय रथं दिव्यं प्रहृष्टेनान्तरात्मना ॥
कमण्डलुजलैः स्वच्छैः स्वयमाचम्य यत्नतः ॥ १२ ॥
समाचम्याथ पुरतः स्वांके राममुपानयत् ॥
अथ दिव्यं धनुस्तस्मै ददौ तूणीरमक्षयम् ॥ १३ ॥
महापाशुपतं नाम दिव्यमस्त्रं ददौ ततः ॥
उक्तश्च तेन रामोऽपि सादरं चन्द्रमौलिना ॥ १४ ॥
जगन्नाशकरं रौद्रमुग्रमस्त्रमिदं नृप ॥
अतो नेदं प्रयोक्तव्यं सामान्यसमरादिके ॥ १५ ॥
अन्यन्नास्ति प्रतीघातमेतस्य भुवनत्रये ॥
तस्मात्प्राणात्यये राम प्रयोक्तव्यमुपस्थिते ॥ १६ ॥
अन्यदैतत्प्रयुक्तं तु जगत्संक्षयकृद्भवेत् ॥
अथाहूय सुरश्रेष्ठान् लोकपालान्महेश्वरः ॥ १७ ॥
उवाच परमप्रीतः स्वं स्वमस्त्रं प्रयच्छत ॥
राघवोऽयं च तैरस्त्रै रावणं निहनिष्यति ॥ १८ ॥
तस्मै देवैरवध्यत्वामिति दत्तो वरो मया ॥
तस्माद्वानरतामेत्य भवन्तो युद्धदुर्मदाः ॥ १९ ॥
साहाय्यमस्य कुर्वन्तु तेन सुस्था भविष्यथ ॥

तदाज्ञां शिरसा गृह्य सुराः प्राञ्जलयस्तथा ॥ २० ॥
प्रणम्य चरणौ शंभोः स्वं स्वमस्त्रं ददुर्मुदा ॥
नारायणास्त्रं दैत्यारिरैन्द्रमस्त्रं पुरंदरः ॥ २१ ॥
ब्रह्मापि ब्रह्मदण्डास्त्रमाग्नेयास्त्रं धनंजयः ॥
याम्यं यमोऽपि मोहास्त्रं रक्षोराजस्तथा ददौ ॥ २२ ॥
वरुणो वारुणं प्रादाद्वायव्यास्त्रं प्रभञ्जनः ॥
कौवेरं च कुबेरोऽपि रौद्रमीशान एव च ॥ २३ ॥
सौरमस्त्रं ददौ सूर्यः सौम्यं सोमश्च पार्वतम् ॥
विश्वेदेवा ददुस्तस्मै वसवो वासवाभिधम् ॥ २४ ॥
अथ तुष्टः प्रणम्येशं रामो दशरथात्मजः ॥
प्राञ्जलिः प्रणतो भूत्वा भक्तियुक्तो व्याजिज्ञपत् ॥ २५ ॥
श्रीराम उवाच ॥ भगवन्मानुषेणैव नोल्लङ्घ्यो लवणाम्बुधिः ॥
तत्र लङ्काभिधं दुर्गं दुर्जयं देवदानवैः ॥ २६ ॥
अनेककोट्यस्तत्र राक्षसा बलवत्तराः ॥
सर्वे स्वाध्यायनिरताः शिवभक्ता जितेन्द्रियाः ॥ २७ ॥
अनेकमायासंयुक्ता बुद्धिमन्तोऽग्निहोत्रिणः ॥
कथमेकाकिना जेया मया भ्रात्रा च संयुगे ॥ २८ ॥
श्रीमहादेव उवाच ॥ रावणस्य वधे राम रक्षसामपि मारणे ॥
विचारो न त्वया कार्यस्तस्य कालोऽयमागतः ॥ २९ ॥
अधर्मे तु प्रवृत्तास्ते देवब्राह्मणपीडने ॥
तस्मादायुःक्षयं यातं तेषां श्रीरपि सुव्रत ॥ ३० ॥
राजस्त्रीकामनासक्तं रावणं निहनिष्यसि ॥
पापासक्तो रिपुर्जेतुः सुकरः समराङ्गणे ॥ ३१ ॥
अधर्मे निरतः शत्रुर्भाग्येनैव हि लभ्यते ॥
अधीतधर्मशास्त्रोऽपि सदा वेदरतोपि वा ॥ ३२ ॥
विनाशकाले संप्राप्ते धर्ममार्गाच्च्युतो भवेत् ॥

पीड्यन्ते देवताः सर्वाः सततं येन पापिना ॥ ३३ ॥
ब्राह्मणा ऋषयश्चैव तस्य नाशः स्वयं स्थितः ॥
किष्किंधानगरे राम देवानामंशसंभवाः ॥ ३४ ॥
वानरा बहवो जाता दुर्जया बलवत्तराः ॥
साहाय्यं ते करिष्यंति तैर्बध्वा च पयोनिधिम् ॥ ३५ ॥
अनेकशैलसंबद्धे सेतौ यान्तु वलीमुखाः ॥
रावणं सगणं हत्वा तामानय निजां प्रियाम् ॥ ३६ ॥
शस्त्रैर्युद्धे जयो यत्र तत्रास्त्राणि न योजयेत् ॥
निरस्त्रेष्वल्पशस्त्रेषु पलायनपरेषु च ॥ ३७ ॥
अस्त्राणि मुञ्चन् दिव्यानि स्वयमेव विनश्यति ॥
अथवा किं बहूक्तेन मयैवोत्पादितं जगत् ॥ ३८ ॥
मयैव पाल्यते नित्यं मया संहियतेऽपि च ॥
अहमेको जगन्मृत्युर्मृत्योरपि महीपते ॥ ३९ ॥
ग्रसेऽहमेव सकलं जगदेतच्चराचरम् ॥
मम वक्त्रगताः सर्वे राक्षसा युद्धदुर्मदाः ॥ ४० ॥
निमित्तमात्रं त्वं भूयाः कीर्तिमाप्स्यसि संगरे ॥ ४१ ॥

इति श्रीपद्मपुराणे शिवगीतासु० रामाय वरप्रदानं नाम पञ्चमोऽध्यायः ॥५॥

श्रीराम उवाच ॥ भगवन्नत्र मे चित्रं महदेतत्प्रजायते ॥
शुद्धस्फटिकसंकाशस्त्रिनेत्रश्चन्द्रशेखरः ॥ १ ॥
मूर्तस्त्वं तु परिच्छिन्नाकृतिः पुरुषरूपधृक् ॥
अम्बया सहितोऽत्रैव रमसे प्रमथैः सह ॥ २ ॥
त्वं कथं पञ्चभूतादि जगदेतच्चराचरम् ॥
तद्ब्रूहि गिरिजाकान्त मयि तेऽनुग्रहो यदि ॥ ३ ॥
श्रीभगवानुवाच ॥ साधु पृष्टं महाभाग दुर्ज्ञेयममरैरपि ॥
तत्प्रवक्ष्यामि ते भक्त्या ब्रह्मचर्येण सुव्रत ॥ ४ ॥

पारं यास्यस्यनायासाद्येन संसारनीरधेः ॥
दृश्यन्ते पञ्च भूतानि ये च लोकाश्चतुर्दश ॥ ५ ॥
समुद्राः सरितो देवा राक्षसा ऋषयस्तथा ॥
दृश्यन्ते यानि चान्यानि स्थावराणि चराणि च ॥ ६ ॥
गन्धर्वाः प्रमथा नागाः सर्वे ते मद्विभूतयः ॥
पुरा ब्रह्मादयो देवा द्रष्टुकामा ममाकृतिम् ॥ ७ ॥
मंदरं प्रययुः सर्वे मम प्रियतरं गिरिम् ॥
स्तुत्वा प्राञ्जलयो देवा मां तदा पुरतः स्थिताः ॥ ८ ॥
तान्दृष्ट्वाथ मया देवान् लीलाकुलितचेतसः ॥
तेषामपहृतं ज्ञानं ब्रह्मादीनां दिवौकसाम् ॥ ९ ॥
अथ तेऽपहृतज्ञाना मामाहुः को भवानिति ॥
अथाब्रुवमहं देवानहमेव पुरातनः ॥ १० ॥
आसं प्रथममेवाहं वर्तामि च सुरेश्वराः ॥
भविष्यामि च लोकेऽस्मिन्मत्तो नान्योऽस्ति कश्चन ॥ ११ ॥
व्यतिरिक्तं च मत्तोऽस्ति नान्यत्किञ्चित्सुरेश्वराः ॥
नित्योऽनित्योऽहमनघो ब्रह्मणां ब्रह्मणस्पतिः ॥ १२ ॥
दक्षिणाश्च उदश्चोऽहं प्राञ्चः प्रत्यञ्च एव च ॥
अधश्चोर्ध्वं च विदिशो दिशश्चाहं सुरेश्वराः ॥ १३ ॥
सावित्री चापि गायत्री स्त्री पुमानपुमानपि ॥
त्रिष्टुब्जगत्यनुष्टुप् च पंक्तिश्छन्दस्त्रयीमयः ॥ १४ ॥
सत्योऽहं सर्वगः शान्तस्त्वताग्निर्गौर्यहं गुरुः ॥
गौर्यहं गह्वरं चाहं द्यौरहं जगतां विभुः ॥ १५ ॥
ज्येष्ठः सर्वसुरश्रेष्ठो वरिष्ठोऽहमपांपतिः ॥
आर्योऽहं भगवानीशस्तेजोऽहं चादिरप्यहम् ॥ १६ ॥
ऋग्वेदोऽहं यजुर्वेदः सामवेदोऽहमात्मभूः ॥
अथर्वणश्च मन्त्रोऽहं तथा चाङ्गिरसो वरः ॥ १७ ॥

इतिहासपुराणानि कल्पोऽहं कल्पवानहम् ॥
नाराशंसी च गाथाहं विद्योपनिषदोऽस्म्यहम् ॥ १८ ॥
श्लोकाः सूत्राणि चैवाहमनुव्याख्यानमेव च ॥
व्याख्यानानि परा विद्या इष्टं हुतमथाहुतिः ॥ १९ ॥
दत्तादत्तमयं लोकः परलोकोऽहमक्षरः ॥
क्षरः सर्वाणि भूतानि दान्तिः शान्तिरहं खगः ॥ २० ॥
गुह्योऽहं सर्ववेदेषु आरण्योहमजोऽप्यहम् ॥
पुष्करं च पवित्रं च मध्यं चाहमतः परम् ॥ २१ ॥
बहिश्चाहं तथा चांतः पुरस्तादहमव्ययः ॥
ज्योतिश्चाहं तमश्चाहं तन्मात्राणीन्द्रियाण्यहम् ॥ २२ ॥
बुद्धिश्चाहमहंकारो विषयाण्यहमेव हि ॥
ब्रह्मा विष्णुर्महेशोहमुमा स्कन्दो विनायकः ॥ २३ ॥
इन्द्रोऽग्निश्च यमश्चाहं निर्ऋतिर्वरुणोऽनिलः ॥
कुबेरोऽहं तथेशानो भूर्भुवः स्वर्महर्जनः ॥ २४ ॥
तपः सत्यं च पृथिवी चापस्तेजोऽनिलोऽप्यहम् ॥
आकाशोऽहं रविः सोमो नक्षत्राणि ग्रहास्तथा ॥ २५ ॥
प्राणः कालस्तथा मृत्युरमृतं भूतमप्यहम् ॥
भव्यं भविष्यत्कृत्स्नं च विश्वं सर्वात्मकोऽप्यहम् ॥२६॥
ओमादौ च तथा मध्ये भूर्भुवः स्वस्तथैव च ॥
ततोऽहं विश्वरूपोऽस्मि शीर्षं च जपतां सदा ॥ २७ ॥
अशितं पायितं चाहं कृतं चाकृतमप्यहम् ॥
परं चैवापरं चाहमहं सर्वपरायणः ॥ २८ ॥
अहं जगद्धितं दिव्यमक्षरं सूक्ष्ममव्ययम् ॥
प्राजापत्यं पवित्रं च सौम्यमग्राह्यमग्रियम् ॥ २९ ॥
अहमेवोपसंहर्ता महाग्रासौजसां निधिः ॥
हृदि यो देवतात्वेन प्राणत्वेन प्रतिष्ठितः ॥ ३० ॥

शिरश्चोत्तरतो यस्य पादौ दक्षिणतस्तथा ॥
यश्च सर्वोत्तरः साक्षादोङ्कारोऽहं त्रिमात्रकः ॥ ३१ ॥
ऊर्ध्वं चोन्नामये यस्मादधश्चापनयाम्यहम् ॥
तस्मादोङ्कार एवाहमेको नित्यः सनातनः ॥ ३२ ॥
ऋचो यजूंषि सामानि यो ब्रह्मा यज्ञकर्मणि ॥
प्रणामये ब्राह्मणेभ्यस्तेनाहं प्रणवो मतः ॥ ३३ ॥
स्नेहो यथा मांसपिण्डं व्याप्नोति व्यापयत्यपि ॥
सर्वान् लोकानहं तद्वत्सर्वव्यापी ततोऽस्म्यहम् ॥ ३४ ॥
ब्रह्मा हरिश्च भगवानाद्यन्तं नोपलब्धवान् ॥
ततोऽन्ये च सुरा यस्मादनन्तोऽहमितीरितः ॥ ३५ ॥
गर्भजन्मजरामृत्युसंसारभवसागरात् ॥
तारयामि यतो भक्तं तस्मात्तारोऽहमीरितः ॥ ३६ ॥
चतुर्विधेषु देहेषु जीवत्वेन वसाम्यहम् ॥
सूक्ष्मो भूत्वा च हृदेशे यत्तत्सूक्ष्मं प्रकीर्तितः ॥ ३७ ॥
महातमसि मग्नेभ्यो भक्तेभ्यो यत्प्रकाशये ॥
विद्युद्वदतुलं रूपं तस्माद्वैद्युतमस्म्यहम् ॥ ३८ ॥
एक एव यतो लोकान् विसृजामि सृजामि च ॥
विवासयामि गृह्णामि तस्मादेकोऽहमीश्वरः ॥ ३९ ॥
न द्वितीयो यतस्तस्थे तुरीयं ब्रह्म यत्स्वयम् ॥
भूतान्यात्मनि संहृत्य चैको रुद्रो वसाम्यहम् ॥ ४० ॥
सर्वाँल्लोकान्यदीशेहमीशिनीभिश्च शक्तिभिः ॥
ईशानमस्य जगतः स्वर्दृशं चक्षुरीश्वरम् ॥ ४१ ॥
ईशानश्चास्मि जगतां सर्वेषामपि सर्वदा ॥
ईशानः सर्वविद्यानां यदीशानस्ततोऽस्म्यम् ॥ ४२ ॥
सर्वभावान्निरीक्षेऽहमात्मज्ञानं निरीक्षये ॥
योगं च गमये तस्माद्भगवान्महतो मतः ॥ ४३ ॥

अजस्रं यच्च गृह्णामि विसृजामि सृजामि च ॥
सर्वाल्लोकान्वासयामि तेनाहं वै महेश्वरः ॥ ४४ ॥
महत्यात्मज्ञानयोगैश्वर्ये यस्तु महीयते ॥
सर्वान् भावान् परित्यज्य महादेवश्च सोऽस्म्यहम् ॥४५॥
एषोस्मि देवः प्रदिशो नु सर्वाः पूर्वो हि जातोस्म्यहमेव गर्भे ॥ अहं हि जातश्च जनिष्यमाणः प्रत्यङ्जनास्तिष्ठति सर्वतोमुखः ॥ ४६ ॥
विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात् ॥ संबाहुभ्यां धमति संपतत्रैर्द्यावाभूमी जनयन्देव एकः ॥ ४७ ॥
वालाग्रमात्रं हृदयस्य मध्ये विश्वं देवं जातवेदं वरेण्यम् ॥ मामात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषाम् ॥ ४८ ॥
अहं योनिमधितिष्ठामि चैको मयेदं पूर्णं पञ्चविधं च सर्वम् ॥ मामीशानं पुरुषं देवमीड्यं विदित्वा निचाय्येमां शान्तिमत्यन्तमेति ॥ ४९ ॥
प्राणेष्वन्तर्मनसो लिङ्गमाहुरस्मिन्क्रोधो या च तृष्णा क्षमा च ॥ तृष्णां हित्वा हेतुजालस्य मूलं बुद्ध्या चित्तं स्थापयित्वा मयीह ॥ एवं ये मां ध्यायमाना भजन्ते तेषां शान्तिः शाश्वती नेतरेषाम् ॥ ५० ॥
यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ॥
आनन्दं ब्रह्म मां ज्ञात्वा न बिभेति कुतश्चन ॥ ५१ ॥
श्रुत्वेति देवा मद्वाक्यं कैवल्यज्ञानमुत्तमम् ॥
जपन्तो मम नामानि मम ध्यानपरायणाः ॥ ५२ ॥
सर्वे ते स्वस्वदेहान्ते मत्सायुज्यं गताः पुरा ॥
ततोऽग्रे परिदृश्यन्ते पदार्था मद्विभूतयः ॥ ५३ ॥

मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम् ॥
मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहम् ॥ ५४ ॥
अणोरणीयानहमेव तद्वन्महानहं विश्वमहं विशुद्धः ॥
पुरातनोऽहं पुरुषोऽहमीशो हिरण्मयोऽहं शिवरूपमस्मि ॥ ५५ ॥
अपाणिपादोऽहमचिन्त्यशक्तिः पश्याम्यचक्षुः स शृणोम्यकर्णः॥ अहं विजानामि विविक्तरूपो न चास्ति वेत्ता मम चित्सदाहम् ॥ ५६ ॥
वेदैरशेषैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम् ॥
न पुण्यपापे मम नास्ति नाशो न जन्म देहेन्द्रियबुद्धिरस्ति ॥ ५७ ॥
न भूमिरापो न च वह्निरस्ति न चानिलो मेऽस्ति न मे नभश्च ॥ एवं विदित्वा परमात्मरूपं गुहाशयं निष्कलमद्वितीयम् ॥ ५८ ॥
समस्तसाक्षिं सदसद्विहीनं प्रयाति शुद्धं परमात्मरूपम्५९
एवं मां तत्त्वतो वेत्ति यस्तु राम महामते ॥
स एव नान्यो लोकेषु कैवल्यफलमश्नुते ॥ ६० ॥

इति श्रीशिवगीतासु० विभूतियोगो नाम षष्ठोऽध्यायः ॥ ६ ॥

श्रीराम उवाच ॥ भगवन्यन्मया पृष्टं तत्त्वथैव स्थितं विभो ॥
अत्रोत्तरं मया लब्धं त्वत्तो नैव महेश्वर ॥ १ ॥
परिच्छिन्नपरीमाणे देहे भगवतस्तव ॥
उत्पत्तिः पञ्चभूतानां स्थितिर्वा विलयः कथम् ॥ २॥
स्वस्वाधिकारसंबद्धाः कथं नाम स्थिताः सुराः ॥
ते सर्वे त्वं कथं देव भुवनानि चतुर्दश ॥ ३ ॥
त्वत्तः श्रुत्वापि देवात्र संशयो मे महानभूत् ॥

अप्रत्यायितचित्तस्य संशयं छेत्तुमर्हसि ॥ ४ ॥
श्रीभगवानुवाच ॥ वटबीजेऽतिसूक्ष्मेऽपि महावटतरुर्यथा ॥
सर्वदास्तेऽन्यथा वृक्षः कुत आयाति तद्वद ॥ ५ ॥
तद्वन्मम तनौ राम भूतानामागतिर्लयः ॥
महासैन्धवपिण्डोऽपि जले क्षिप्तो विलीयते ॥ ६ ॥
न दृश्यते पुनः पाकात्कुत आयाति पूर्ववत् ॥
प्रातःप्रातर्यथाऽऽलोको जायते सूर्यमण्डलात् ॥ ७ ॥
एवं मत्तो जगत्सर्वं जायतेऽस्ति विलीयते ॥
मय्येव सकलं राम तद्वज्जानीहि सुव्रत ॥ ८ ॥
श्रीराम उवाच ॥ कथितेऽपि महाभाग दिग्जडस्य यथा दिशि ॥
निवर्तते भ्रमो नैव तद्वन्मम करोमि किम् ॥ ९ ॥
श्रीभगवानुवाच ॥ मयि सर्वं यथा राम जगदेतच्चराचरम् ॥
वर्तते तदर्शयामि न द्रष्टुं क्षमते भवान् ॥ १० ॥
दिव्यं चक्षुः प्रदास्यामि तुभ्यं दशरथात्मज ॥
तेन पश्य भयं त्यक्त्वा मत्तेजोमण्डलं ध्रुवम् ॥ ११ ॥
न चर्मचक्षुषा द्रष्टुं शक्यते मामकं महः ॥
नरेण वा सुरेणापि तन्ममानुग्रहं विना ॥ १२ ॥
सूत उवाच ॥इत्युक्त्वा प्रददौ तस्मै दिव्यं चक्षुर्महेश्वरः॥
अथादर्शयदेतस्मै वक्त्रं पातालसंनिभम् ॥ १३ ॥
विद्युत्कोटिप्रभं दीप्तमतिभीमं भयावहम् ॥
तद्दृष्ट्वैव भयाद्रामो जानुभ्यामवनिं गतः ॥१४॥
प्रणम्य दण्डवद्भूमौ तुष्टाव च पुनः पुनः ॥
अथोत्थाय महावीरो यावदेव प्रपश्यति ॥ १५ ॥
वक्त्रं पुरभिदस्तत्र अन्तर्ब्रह्माण्डकोटयः ॥
चटका इव लक्ष्यन्ते ज्वालामालासमाकुलाः ॥ १६ ॥
मेरुमन्दरविंध्याद्या गिरयः सप्त सागराः ॥

दृश्यन्ते चन्द्रसूर्याद्याः पञ्च भूतानि ते सुराः ॥ १७ ॥
अरण्यानि महानागा भुवनानि चतुर्दश ॥
प्रतिब्रह्माण्डमेवं तद्दृष्ट्वा दशरथात्मजः ॥ १८ ॥
सुरासुराणां संग्रामास्तत्र पूर्वापरानपि ॥
विष्णोर्दशावतारांश्च तत्तत्कर्माण्यपि द्विजाः ॥ १९ ॥
पराभवांश्च देवानां पुरदाहं महेशितुः ॥
उत्पद्यमानानुत्पन्नान्सर्वानपि विनश्यतः ॥ २० ॥
दृष्ट्वा रामो भयाविष्टः प्रणनाम पुनः पुनः ॥
उत्पन्नतत्त्वज्ञानोऽपि बभूव रघुनन्दनः ॥ २१ ॥
अथोपनिषदां सारैरर्थैस्तुष्टाव शंकरम् ॥ २२ ॥

श्रीराम उवाच ॥ देव प्रपन्नार्तिहर प्रसीद प्रसीद विश्वेश्वर विश्ववन्द्य ॥ प्रसीद गङ्गाधर चन्द्रमौले मां त्राहि संसारभयादनाथम् ॥ २३ ॥
त्वत्तो हि जातं जगदेतदीश त्वय्येव भूतानि वसन्ति नित्यम् ॥ त्वय्येव शंभो विलयं प्रयान्ति भूमौ यथा वृक्षलतादयोऽपि ॥ २४ ॥
ब्रह्मेन्द्ररुद्राश्च मरुद्गणाश्च गन्धर्वयक्षाऽसुरसिद्धसङ्घाः ॥ गङ्गादिनद्यो वरुणालयाश्च वसन्ति शूलिंस्तव वक्त्रयंत्रे ॥ २५ ॥
त्वन्मायया कल्पितमिन्दुमौले त्वय्येव दृश्यत्वमुपैति विश्वम् ॥ भ्रान्त्या जनः पश्यति सर्वमेतच्छुक्तौ यथा रौप्यमहिं च रज्जौ ॥ २६ ॥
तेजोभिरापूर्य जगत्समस्तं प्रकाशमानः कुरुषे प्रकाशम् ॥ विना प्रकाशं तव देवदेव न दृश्यते विश्वमिदं क्षणेन ॥ २७ ॥
अल्पाश्रयो नैव बृहन्तमर्थं धत्तेऽणुरेको न हि विन्ध्य-

शैलम् ॥ त्वद्वक्त्रमात्रे जगदेतदस्ति त्वन्माययैवेति विनिश्चिनोमि ॥ २८ ॥
रज्जौ भुजङ्गो भयदो यथैव न जायते नास्ति न चैति नाशम् ॥ त्वन्मायया केवलमात्तरूपं तथैव विश्वं त्वयि नीलकण्ठ ॥ २९ ॥
विचार्यमाणे तव यच्छरीरमाधारभावं जगतामुपैति ॥
तदप्यवश्यं मदविद्ययैव पूर्णश्चिदानन्दमयो यतस्त्वम् ३०
पूजेष्टपूर्तादिवराक्रियाणां भोक्तुः फलं यच्छसि विश्वमेव ॥
मृषैतदेवं वचनं पुरारे त्वतोऽस्ति भिन्नं न च किञ्चिदेव ॥ ३१ ॥
अज्ञानमूढा मुनयो वदन्ति पूजोपचारादिबहिःक्रियाभिः ॥ तोषं गिरीशो भजतीति मिथ्या कुतस्त्वमूर्तस्य तु भोगलिप्सा ॥ ३२ ॥
किञ्चिद्दलं वा चुलकोदकं वा यस्त्वं महेश प्रतिगृह्य दत्से ॥ त्रैलोक्यलक्ष्मीमपि यज्जनेभ्यः सर्वं त्वविद्याकृतमेव मन्ये ॥ ३३ ॥
व्याप्नोषि सर्वा विदिशो दिशश्च त्वं विश्वमेकः पुरुषः पुराणः ॥ नष्टेऽपि तस्मिंस्तव नास्ति हानिर्घटे विनष्टे नभसो यथैव ॥ ३४ ॥
यथैकभाकाशगमर्कबिम्बं क्षुद्रेषु पात्रेषु जलान्वितेषु ॥
भजत्यनेकप्रतिबिम्बभावं तथा त्वमन्तःकरणेषु देव ३५
संसर्जने वाऽप्यवने विनाशे विश्वस्य किञ्चित्तव नास्ति कार्यम् ॥अनादिभिः प्राणभृतामदृष्टैस्तथापि तत्स्वप्नवदातनोषि ॥ ३६ ॥
स्थूलस्य सूक्ष्मस्य जडस्य भोगो देहस्य शंभो न चिदं विनास्ति ॥ अतस्त्वदारोपणमातनोति श्रुतिः पुरारे

सुखदुःखयोः सदा ॥ ३७ ॥
नमः सच्चिदाम्भोधिहंसाय तुभ्यं नमः कालकालाय
कालात्मकाय ॥ नमस्ते समस्ताघसंहारकर्त्रे नमस्ते
मृषाचित्तवृत्त्यैकभोक्त्रे ॥ ३८ ॥
सूत उवाच ॥एवं प्रणम्य विश्वेशं पुरतः प्राञ्जलिः स्थितः ॥
विस्मितः परमेशानं जगाद रघुनन्दनः ॥ ३९ ॥
श्रीराम उवाच ॥ उपसंहर विश्वात्मन्विश्वरूपमिदं तव ॥
प्रतीतं जगदैकात्म्यं शंभो भवदनुग्रहात् ॥ ४० ॥
श्रीभगवानुवाच। पश्य राम महाबाहो मत्तो नान्योऽस्तिकश्चन४१
सूत उवाच ॥ उत्युक्त्वैवोपसंजह्रे स्वदेहे देवतादिकान् ॥
मीलिताक्षः पुनर्हर्षाद्यावद्रामः प्रपश्यति ॥ ४२ ॥
तावदेव गिरेः शृङ्गे व्याघ्रचर्मोपरि स्थितम् ॥
ददर्श पञ्चवदनं नीलकण्ठं त्रिलोचनम् ॥ ४३ ॥
व्याघ्रचर्माम्बरधरं भूतिभूषितविग्रहम् ॥
फणिकङ्कणभूषाढ्यं नागयज्ञोपवीतिनम् ॥ ४४ ॥
व्याघ्रचर्मोत्तरीयं च विद्युत्पिङ्गजटाधरम् ॥
एकाकिनं चन्द्रमौलिं वरेण्यमभयप्रदम् ॥ ४५ ॥
चतुर्भुजं खण्डपरशुं मृगहस्तं जगत्पतिम् ॥
अथाज्ञया पुरस्तस्य प्रणम्योपविवेश सः ॥ ४६ ॥
अथाह रामं देवेशो यद्यत्प्रष्टुमभीच्छसि ॥
तत्सर्वं पृच्छ राम त्वं मत्तो नान्योऽस्ति ते गुरुः॥४७॥
॥ इति श्रीशिवगीतासु० विश्वरूपदर्शनं नाम सप्तमोऽध्यायः ॥ ७ ॥

श्रीराम उवाच ॥ पाञ्चभौतिकदेहस्य चोत्पत्तिर्विलयः स्थितिः ॥
स्वरूपं च कथं देव भगवन्वक्तुमर्हसि ॥ १ ॥
श्रीभगवानुवाच ॥ पञ्चभूतैः समारब्धो देहोऽयं पाञ्चभौतिकः ॥

तत्र प्रधानं पृथिवी शेषाणां सहकारिता ॥ २ ॥
जरायुजोऽण्डजश्चैव स्वेदजश्चोद्भिजस्तथा ॥
एवं चतुर्विधः प्रोक्तो देहोऽयं पाञ्चभौतिकः ॥ ३ ॥
मानसस्तु परः प्रोक्तो देवानामेव संस्मृतः ॥
तत्र वक्ष्ये प्रथमतः प्रधानत्वाज्जरायुजम् ॥ ४ ॥
शुक्रशोणितसंभूता वृत्तिरेव जरायुजः ॥
स्त्रीणां गर्भाशये शुक्रमृतुकाले विशेद्यदा ॥ ५ ॥
योषितो रजसा युक्तं तदेव स्याज्जरायुजम् ॥
बाहुल्याद्रजसः स्त्री स्याच्छुक्राधिक्ये पुमान्भवेत् ॥६॥
शुक्रशोणितयोः साम्ये जायते च नपुंसकः ॥
ऋतुस्नाता भवेन्नारी चतुर्थे दिवसे ततः ॥ ७ ॥
ऋतुकालस्तु निर्दिष्ट आषोडशदिनावधि ॥
तत्रायुग्मदिने स्त्री स्यात्पुमान्युग्मदिने भवेत् ॥ ८ ॥
षोडशे दिवसे गर्भो जायते यदि सुभ्रुवः ॥
चक्रवर्ती भवेद्राजा जायते नात्र संशयः ॥ ९ ॥
ऋतुस्नाता यस्य पुंसः साकाङ्क्षं मुखमीक्षते ॥
तदाकृतिर्भवेद्गर्भस्तत्पश्येत्स्वामिनो मुखम् ॥ १० ॥
याऽस्ति चर्मावृतिः सूक्ष्मा जरायुः सा निगद्यते ॥
शुक्रशोणितयोर्योगस्तस्मिन्नेव भवेद्यतः ॥
तत्र गर्भो भवेद्यस्मात्तेन प्रोक्तो जरायुजः ॥ ११ ॥
अण्डजाः पक्षिसर्पाद्याः स्वेदजा मशकादयः ॥
उद्भिज्जास्तृणगुल्माद्या मानसाश्च सुरर्षयः ॥ १२ ॥
जन्मकर्मवशादेव निषिक्तं स्मरमन्दिरे ॥
शुक्रं रजःसमायुक्तं प्रथमे मासि तद्द्रवम् ॥ १३ ॥
बुद्बुदं कललं तस्मात्ततः पेशी भवेदिदम् ॥
पेशीघनं द्वितीये तु मासि पिण्डः प्रजायते ॥ १४ ॥

कराङ्घ्रिशीर्षकादीनि तृतीये संभवन्ति हि ॥
अभिव्यक्तिश्च जीवस्य चतुर्थे मासि जायते ॥ १५ ॥
ततश्चलति गर्भोऽपि जनन्या जठरे स्वतः ॥
पुत्रश्चेद्दक्षिणे पार्श्वे कन्या वामे च तिष्ठति ॥ १६ ॥
नपुंसकस्तूदरस्य भागे तिष्ठति मध्यतः ॥
अतो दक्षिणपार्श्वे तु शेते माता पुमान्यदि ॥ १७
अङ्गप्रत्यङ्गभागाश्च सूक्ष्माः स्युर्युगपच्चदा ॥
विहाय श्मश्रुदन्तादीञ्जन्मानन्तरसंभवान् ॥ १८ ॥
चतुर्थे व्यक्तता तेषां भावानामपि जायते ॥
पुंसां स्थैर्यादयो भावा भीरुत्वाद्यास्तु योषिताम्॥१९॥
नपुंसके च ते मिश्रा भवन्ति रघुनन्दन ॥
मातृजं चास्य हृदयं विषयानभिकाङ्क्षति ॥ २० ॥
ततो मातुर्मनोऽभीष्टं कुर्याद्गर्भविवृद्धये ॥
तां च द्विहृदयां नारीमाहुर्दौहृदिनीं ततः ॥ २१ ॥
अदानाद्दौहृदानां स्युर्गर्भस्य व्यङ्गतादयः ॥
मातुर्यद्विषये लोभस्तदार्तो जायते सुतः ॥ २२ ॥
प्रबुद्धं पञ्चमे चित्तं मांसशोणितपुष्टता ॥
षष्ठेऽस्थिस्नायुनखरकेशलोमविविक्तता ॥ २३ ॥
बलवर्णौ चोपचितौ सप्तमे त्वङ्गपूर्णता ॥
पादान्तरितहस्ताभ्यां श्रोत्ररन्ध्रे पिधाय सः ॥ २४ ॥
उद्विग्नो गर्भसंवासादस्ति गर्भलयान्वितः ॥ २५ ॥
आविर्भूतप्रबोधोऽसौ गर्भदुःखादिसंयुतः ॥
हा कष्टमिति निर्विण्णः स्वात्मानं शोशुचीत्यथ ॥२६॥
अनुभूता महासह्याः पुरा मर्माच्छिदोऽसकृत् ॥
करंभवालुकास्तप्ताश्चादह्यन्तासुखाशयाः ॥ २७ ॥
जठरानलसंतप्तपित्ताख्यरसविप्लुषः ॥

गर्भाशये निमग्नं तु दहन्त्यतिभृशं तु माम् ॥ २८ ॥
उदर्यकृमिवक्त्राणि कूटशाल्मलिकण्टकैः ॥
तुल्यानि च तुदन्त्यार्तं पार्श्वास्थिक्रकचार्दितम् ॥२९॥
गर्भे दुर्गन्धभूयिष्ठे जठराग्निप्रदीपिते ॥
दुःखं मयाप्तं यत्तस्मात्कनीयः कुम्भपाकजम् ॥ ३० ॥
पूयासृक्श्लेष्मपायित्वं वान्ताशित्वं च यद्भवेत् ॥
अशुचौ कृमिभावश्च तत्प्राप्तं गर्भशायिना ॥ ३१ ॥
गर्भशय्यां समारुह्य दुःखं यादृङ् मयापि तत् ॥
नातिशेते महादुःखं निःशेषनरकेषु तत् ॥ ३२ ॥
एवं स्मरन्पुरा प्राप्ता नानाजातीश्च यातनाः ॥
मोक्षोपायमभिध्यायन्वर्ततेऽभ्यासतत्परः ॥ ३३ ॥
अष्टमे त्वक्सृती स्यातामोजस्तेजश्च हृद्भवम् ॥
शुभ्रमापीतरक्तं च निमित्तं जीवितं मतम् ॥ ३४ ॥
मातरं च पुनर्गर्भे चञ्चलं तत्प्रधावति ॥
ततो जातोऽष्टमे गर्भो न जीवत्योजसोज्झितः ॥ ३५ ॥
किंचित्कालमवस्थानं संस्कारात्पीडिताङ्गवत् ॥
समयः प्रसवस्य स्यान्मासेषु नवमादिषु ॥ ३६ ॥
मातुरस्रवहां नाडीमाश्रित्यान्ववतारिता ॥
नाभिस्थनाडी गर्भस्य मात्राहाररसावहा ॥
तेन जीवति गर्भोऽपि मात्राहारेण पोषितः ॥ ३७ ॥
अस्थियन्त्राविनिष्पिष्टः पतितः कुक्षिवर्त्मना ॥
मेदोऽसृग्दिग्धसर्वाङ्गो जरायुपुटसंवृतः ॥ ३८ ॥
निष्क्रामन्भृशदुःखार्तो रुदन्नुच्चैरधोमुखः ॥
यन्त्रादेव विनिर्मुक्तः पतत्युत्तानशाय्युत ॥ ३९ ॥
अकिंचित्करस्तथा बालो मांसपेशीसमास्थितः ॥
श्वमार्जारादिदंष्ट्रिभ्यो रक्ष्यते दण्डपाणिभिः ॥ ४० ॥

पितृवद्राक्षसं वेत्ति मातृवद्डाकिनीमपि ॥
पूयं पयोवदज्ञानादीर्घकष्टं तु शैशवम् ॥ ४१ ॥
श्लेष्मणा पिहिता नाडी सुषुम्ना यावदेव हि ॥
व्यक्तवर्णं च वचनं तावद्वक्तुं न शक्यते ॥ ४२ ॥
अतएव च गर्भेऽपि रोदितुं नैव शक्यते ॥ ४३ ॥
दृप्तोऽथ यौवनं प्राप्य मन्मथज्वरविह्वलः ॥
गायत्यकस्मादुच्चैस्तु तथाकस्माच्च वल्गति ॥ ४४ ॥
आरोहति तरून्वेगाच्छान्तानुद्वेजयत्यपि ॥
कामक्रोधमदान्धः सन्न कांश्चिदपि वीक्षते ॥ ४५ ॥
अस्थिमांसशिरालाया वामाया मन्मथालये ॥
उत्तानपूतिमण्डूकपाटितोदरसन्निभे ॥
आसक्तः स्मरबाणार्त आत्मना दह्यते भृशम् ॥ ४६ ॥
अस्थिमांसशिरात्वग्भ्यः किमन्यद्वर्तते वपुः ॥
वामानां मायया मूढो न किंचिद्वीक्षते जगत् ॥ ४७ ॥
निर्गते प्राणपवने देहो हंत मृगीदृशः ॥
यथाहि जायते नैव वीक्ष्यते पञ्चभिर्दिनैः ॥ ४८ ॥
महापरिभवस्थानं जरां प्राप्यातिदुःखितः ॥
श्लेष्मणा पिहितोरस्को जग्धमन्नं न जीर्यति ॥ ४९ ॥
सन्नदन्तो मन्ददृष्टिः कटुतिक्तकषायभुक् ॥
वातभुग्नकटिग्रीवकरोरुचरणोऽबलः ॥ ५० ॥
गदायुतसमाविष्टः परित्यक्तः स्वबन्धुभिः ॥
निःशौचो मलदिग्धाङ्ग आलिङ्गितवरोषितः ॥ ५१ ॥
ध्यायन्नसुलभान्भोगान्केवलं वर्तते चलः ॥
सर्वेन्द्रियक्रियालोपाद्धस्यते बालकैरपि ॥ ५२ ॥
ततो मृतिजदुःखस्य दृष्टान्तो नोपलभ्यते ॥
यस्माद्बिभ्यति भूतानि प्राप्तान्यपि परां रुजम् ॥ ५३ ॥

नीयते मृत्युना जन्तुः परिष्वक्तोऽपि बन्धुभिः ॥
सागरान्तर्जलगतो गरुडेनेव पन्नगः ॥ ५४ ॥
हा कान्ते हा धनं पुत्राः क्रन्दमानः सुदारुणम् ॥
मण्डूक इव सर्पेण मृत्युना नीयते नरः ॥ ५५ ॥
मर्मसून्मथ्यमानेषु मुच्यमानेषु संधिषु ॥
यद्दुःखं म्रियमाणस्य स्मर्यतां तन्मुमुक्षुभिः ॥ ५६ ॥
दृष्ट्वावाक्षिप्यमाणायां संज्ञया ह्रियमाणया ॥
मृत्युपाशेन बद्धस्य त्राता नैवोपलभ्यते ॥ ५७ ॥
संरुध्यमानस्तमसा महच्चित्तमिवाविशन् ॥
उपाहूतस्तदा ज्ञातीनीक्षते दीनचक्षुषा ॥ ५८ ॥
अयःपाशेन कालेन स्नेहपाशेन बन्धुभिः ॥
आत्मानं कृष्यमाणं तं वीक्षते परितस्तथा ॥ ५९ ॥
हिक्कया बाध्यमानस्य श्वासेन परिशुष्यतः ॥
मृत्युनाकृष्यमाणस्य न खल्वस्ति परायणम् ॥ ६० ॥
संसारयन्त्रमारूढो यमदूतैरधिष्ठितः ॥
क्व यास्यामीति दुःखार्तः कालपाशेन योजितः ॥६१॥
किं करोमि क्व गच्छामि किं गृह्णामि त्यजामि किम् ॥
इतिकर्तव्यतामूढः कृच्छ्राद्देहात्त्यजत्यसून् ॥ ६२ ॥
यातनादेहसंबद्धो यमदूतैरधिष्ठिताः ॥
इतो गत्वानुभवति या यास्ता यमयातनाः ॥
तासु यद्भवते दुःखं तद्वक्तुं क्षमते कुतः ॥ ६३ ॥
कर्पूरचन्दनाद्यैस्तु लिप्यते सततं हि यत् ॥
भूषणैर्भूष्यते चित्रैः सुवस्त्रैः परिवार्यते ॥ ६४ ॥
अस्पृश्यं जायतेऽप्रेक्ष्यं जीवत्यक्तं सदा वपुः ॥
निष्कासयन्ति निलयात्क्षणं न स्थापयन्त्यपि ॥६५॥
दह्यते च ततः काष्ठैस्तद्भस्म क्रियते क्षणात् ॥

भक्ष्यते वा सृगालैश्च गृध्रकुक्करवायसैः ॥
पुनर्न दृश्यते सोऽथ जन्मकोटिशतैरपि ॥ ६६ ॥
माता पिता गुरुजनः स्वजनो ममेति मायोपमे जगति
कस्य भवेत्प्रतिज्ञा ॥ एको यतो व्रजति कर्मपुरःसरोऽयं
विश्रामवृक्षसदृशः खलु जीवलोकः ॥ ६७ ॥
सायं सायं वासवृक्षं समेताः प्रातः प्रातस्तेन तेन प्रया-
न्ति ॥ त्यक्त्वान्योन्यं तं च वृक्षं विहङ्गा यद्वत्तद्वज्ज्ञात-
योऽज्ञातयश्च ॥ ६८ ॥
मृतिबीजं भवेज्जन्म जन्मबीजं भवेन्मृतिः
घटयंत्रवदश्रान्तो बम्भ्रमीत्यनिशं नरः ॥ ६९ ॥
गर्भे पुंसः शुक्रपाताद्यदुक्तं मरणावधि ॥
तदेतस्य महाव्याधेर्मत्तो नान्योऽस्ति भेषजम् ॥ ७० ॥

इति श्रीशिवगीतासु० पिण्डोत्पत्तिकथनं नामाष्टमोऽध्यायः ॥ ८ ॥

श्रीभगवानुवाच ॥ देहस्वरूपं वक्ष्यामि शृणुष्वावहितो नृप ॥
मत्तो हि जायते विश्वं मय्येवैतत्प्रधार्यते ॥
मय्येवेदमधिष्ठाने लीयते शुक्तिरौप्यवत् ॥ १ ॥
अहं तु निर्मलः पूर्णः सच्चिदानन्दविग्रहः ॥
असंगो निरहंकारः शुद्धं ब्रह्म सनातनम् ॥ २ ॥
अनाद्यविद्यायुक्तः सन् जगत्कारणतां व्रजे ॥ ३ ॥
अनिर्वाच्या महाविद्या त्रिगुणा परिणामिनी ॥
रजः सत्त्वं तमश्चेति त्रिगुणाः परिकीर्तिताः ॥ ४ ॥
सत्त्वं शुक्लं समादिष्टं सुखज्ञानास्पदं नृणाम् ॥
दुःखास्पदं रक्तवर्णं चञ्चलं च रजो मतम् ॥ ५ ॥
तमः कृष्णं जडं प्रोक्तमुदासीनं सुखादिषु ॥ ६ ॥
अतो मम समायोगाच्छक्तिः सा त्रिगुणात्मिका ॥

अधिष्ठाने तु मय्येव भजते विश्वरूपताम् ॥
शुक्तौ रजतवद्रज्जौ भुजङ्गो यद्वदेव तु ॥ ७ ॥
आकाशादीनि जायन्ते मत्तो भूतानि मायया ॥
तैरारब्धमिदं विश्वं देहोऽयं पाञ्चभौतिकः ॥ ८ ॥
पितृभ्यामशितादन्नात्षट्कोशं जायते वपुः ॥
स्नायवोऽस्थीनि मज्जा च जायन्ते पितृतस्तथा ॥ ९ ॥
त्वङ्मांसशोणितमिति मातृतश्च भवन्ति हि ॥
भावाः स्युः षड्विधास्तस्य मातृजाः पितृजास्तथा ॥
रसजा आत्मजाः सत्त्वसंभूताः स्वात्मजास्तथा ॥१०॥
मृदवः शोणितं मेदो मज्जा प्लीहा यकृद्धृदम् ॥
हन्नाभीत्येवमाद्यास्तु भावा मातृभवा मताः ॥ ११ ॥
श्मश्रुलोमकचस्नायुशिराधमनयो नखाः ॥
दशनाः शुक्रमित्याद्याः स्थिराः पितृसमुद्भवाः ॥ १२॥
शरीरोपचितिर्वर्णो वृद्धिस्तृप्तिर्बलं स्थितिः ॥
अलोलुपत्वमुत्साह इत्यादि रसजं विदुः ॥ १३ ॥
इच्छा द्वेषः सुखं दुःखं धर्माधर्मौ च भावना ॥
प्रयत्नो ज्ञानमायुश्चेन्द्रियाणीत्येवमात्मजाः ॥ १४ ॥
ज्ञानेन्द्रियाणि श्रवणं स्पर्शनं दर्शनं तथा ॥
रसनं घ्राणमित्याहुः पञ्च तेषां तु गोचराः ॥ १५ ॥
शब्दः स्पर्शस्तथा रूपं रसो गंध इति क्रमात् ॥
वाक्पाण्ड्रिपायुपस्थान्याहुः कर्मेन्द्रियाणि हि ॥ १६ ॥
वचनादानगमनविसर्गरतयः क्रमात् ॥
कर्मेंद्रियाणां जानीयान्मनश्चैवोभयात्मकम् ॥ १७ ॥
क्रियास्तेषां मनोबुद्धिरहंकारस्ततः परम् ॥
अन्तःकरणमित्याहुश्चित्तं चेति चतुष्टयम् ॥ १८ ॥
सुखं दुःखं च विषयौ विज्ञेयौ मनसः क्रियाः ॥

स्मृतिभीतिविकल्पाद्या बुद्धिः स्यान्निश्चयात्मिका ॥
अहं ममेत्यहंकारश्चित्तं चेतयते यतः ॥ १९ ॥
सत्त्वाख्यमन्तःकरणं गुणभेदात्त्रिधा मतम् ॥
सत्त्वं रजस्तम इति गुणाः सत्त्वात्तु सात्त्विकाः ॥ २० ॥
आस्तिक्यशुद्धिधर्मैकमतिप्रभृतयो मताः ॥
रजसो राजसा भावाः कामक्रोधमदादयः ॥ २१ ॥
निद्रालस्यप्रमादादि वञ्चनाद्यास्तु तामसाः ॥
प्रसन्नेन्द्रियतारोग्यानालस्याद्यास्तु सत्त्वजाः ॥ २२ ॥
देहो मात्रात्मकस्तस्मादादत्ते तद्गुणानिमान् ॥
शब्दः श्रोत्रं मुखरता वैचित्र्यं सूक्ष्मता धृतिः ॥ २३ ॥
बलं च गगनाद्वायोः स्पर्शश्च स्पर्शनेन्द्रियम् ॥
उत्क्षेपणमपक्षेपाकुञ्चने गमनं तथा ॥ २४ ॥
प्रसारणमितीमानि पञ्च कर्माणि रूक्षता ॥
प्राणापानौ तथा व्यानसमानोदानसंज्ञकान् ॥ २५ ॥
नागः कूर्मश्च कृकलो देवदत्तो धनंजयः ॥
दशैता वायुविकृतीस्तथा गृह्णाति लाघवम् ॥ २६ ॥
तेषां मुख्यतरः प्राणो नाभेः कण्ठादवस्थितः ॥
चरत्यसौ नासिकयोर्नाभौ हृदयपङ्कजे ॥ २७ ॥
शब्दोच्चारणनिश्वासोच्छ्वासादेरपि कारणम् ॥ २८ ॥
अपानस्तु गुदे मेढ्रे कटिजङ्घोरुदेशगः ॥
नाभिकंठे वंक्षणयोरूरुजानुषु तिष्ठति ॥
तस्य मूत्रपुरीषादिविसर्गः कर्म कीर्तितम् ॥ २९ ॥
व्यानोऽक्षिश्रोत्रगुल्फेषु जिह्वाघ्राणेषु तिष्ठति ॥
प्राणायामधृतित्यागग्रहणाद्यस्य कर्म च ॥ ३० ॥
समानो व्याप्य निखिलं शरीरं वह्निना सह ॥
द्विसप्ततिसहस्रेषु नाडीरन्ध्रेषु संचरन् ॥ ३१ ॥

भुक्तपीतरसान्सम्यगानयन्देहपुष्टिकृत् ॥
उदानः पादयोरास्ते हस्तयोरङ्गसंधिषु ॥ ३२ ॥
कर्मास्य देहोन्नयनोत्क्रमणादि प्रकीर्तितम् ॥
त्वगादिधातूनाश्रित्य पञ्च नागादयः स्थिताः ॥ ३३ ॥
उद्गारादि निमेषादि क्षुत्पिपासादिकं क्रमात् ॥
तन्द्रीप्रभृति शोकादि तेषां कर्म प्रकीर्तितम् ॥ ३४ ॥
अग्नेस्तु रोचकं रूपं दीप्तं पाकं प्रकाशताम् ॥
अमर्षतीक्ष्णसूक्ष्माणामोजस्तेजश्च शूरताम् ॥ ३५ ॥
मेधावितां तथाऽऽदत्ते जलात्तु रसनं रसम् ॥
शैत्यं स्नेहं द्रवं स्वेदं गात्रादिमृदुतामपि ॥ ३६ ॥
भूमेर्घ्राणेन्द्रियं गन्धं स्थैर्यं धैर्यं च गौरवम् ॥
त्वगसृङ्मांसमेदोऽस्थिमज्जाशुक्राणि धातवः ॥ ३७ ॥
अन्नं पुंसाशितं त्रेधा जायते जठराग्निना ॥
मलः स्थविष्ठो भागः स्यान्मध्यमो मांसतां व्रजेत् ॥
मनः कनिष्ठो भागः स्यात्तस्मादन्नमयं मनः ॥ ३८ ॥
अपां स्थविष्ठो मूत्रं स्यान्मध्यमो रुधिरं भवेत् ॥
प्राणः कनिष्ठो भागः स्यात्तस्मात्प्राणो जलात्मकः॥३९॥
तेजसोऽस्थि स्थविष्ठः स्यान्मज्जा मध्यमसंभवः ॥
कनिष्ठा वाङ् मता तस्मात्तेजोऽवन्नात्मकं जगत् ॥ ४० ॥
लोहिताज्जायते मांसं मेदो मांससमुद्भवम् ॥
मेदसोऽस्थीनि जायन्ते मज्जा चास्थिसमुद्भवा ॥४१॥
नाड्योपि मांससंघाताच्छुक्रं मज्जासमुद्भवम् ॥ ४२ ॥
वातपित्तकफाश्चात्र धातवः परिकीर्तिताः ॥
दशाञ्जलि जलं ज्ञेयं रसस्याञ्जलयो नव ॥ ४३ ॥
रक्तस्याष्टौ पुरीषस्य सप्त स्युः श्लेष्मणश्च षट् ॥
पित्तस्य पञ्च चत्वारो मूत्रस्याञ्जलयस्त्रयः ॥ ४४ ॥

वसाया मेदसो द्वौ तु मज्जा त्वञ्जलिसंमिता ॥
अर्धाञ्जलि तथा शुक्रं तदेव बलमुच्यते ॥ ४५ ॥
अस्थ्नां शरीरे संख्या स्यात्षष्टियुक्तं शतत्रयम् ॥
जलजानि कपालानि रुचकास्तरणानि च ॥
नलकानीति तान्याहुः पञ्चधास्थीनि सूरयः ॥ ४६ ॥
द्वे शते त्वस्थिसंधीनां स्यातां तत्र दशोत्तरे ॥
रौरवाः प्रसराः स्कन्दसेचनाः स्युरुलूखलाः ॥ ४७ ॥
समुद्गा मण्डलाः शंखावर्ता वामनकुण्डलाः ॥
इत्यष्टधा समुद्दिष्टाः शरीरेष्वास्थिसंधयः ॥ ४८ ॥
सार्धकोटित्रयं रोम्णां श्मश्रुकेशास्त्रिलक्षकाः ॥
देहस्वरूपमेवं ते प्रोक्तं दशरथात्मज ॥ ४९ ॥
यस्मादसारो नास्त्येव पदार्थो भुवनत्रये ॥
देहेऽस्मिन्नभिमानेन न महोपायबुद्धयः ॥ ५० ॥
अहंकारेण पापेन क्रियन्ते हंत सांप्रतम् ॥
तस्मादेतत्स्वरूपं तु विबोद्धव्यं मुमुक्षुभिः ॥ ५१ ॥

इति श्रीशिवगीतासु० देहस्वरूपनिर्णयो नाम नवमोऽध्यायः ॥ ९ ॥

श्रीराम उवाच ॥ भगवन्नत्र जीवोऽसौ जन्तोर्देहेऽवतिष्ठते ॥
जायते वा कुतो जीवः स्वरूपं चास्य किं वद ॥ १ ॥
देहान्ते कुत्र वा याति गत्वा वा कुत्र तिष्ठति ॥
कथमायाति वा देहं पुनर्नायाति वा वद ॥ २ ॥

श्रीभगवानुवाच ॥ साधु पृष्टं महाभाग गुह्याद्गुह्यतरं हि यत् ॥
देवैरपि सुदुर्ज्ञेयमिन्द्राद्यैर्वा महर्षिभिः ॥ ३ ॥
अन्यस्मै नैव वक्तव्यं मयापि रघुनन्दन ॥
त्वद्भक्त्याहं परं प्रीतो वक्ष्याम्यवहितः शृणु ॥ ४ ॥
सत्यज्ञानात्मकोऽनन्तः परमानन्दविग्रहः ॥

परमात्मा परंज्योतिरव्यक्तो व्यक्तकारणम् ॥ ५ ॥
नित्यो विशुद्धः सर्वात्मा निर्लेपोऽहं निरञ्जनः ॥
सर्वधर्मविहीनश्च न ग्राह्यो मनसापि च ॥ ६ ॥
नाहं सर्वेन्द्रियग्राह्यः सर्वेषां ग्राहको ह्यहम् ॥
ज्ञाताहं सर्वलोकस्य मम ज्ञाता न विद्यते ॥ ७ ॥
दूरः सर्वविकाराणां परिणामादिकस्य च ॥ ८ ॥
यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ॥
आनन्दं ब्रह्म मां ज्ञात्वा न बिभेति कुतश्चन ॥ ९ ॥
यस्तु सर्वाणि भूतानि मय्येवेति प्रपश्यति ॥
मां च सर्वेषु भूतेषु ततो न विजुगुप्सते ॥ १० ॥
यस्य सर्वाणि भूतानि ह्यात्मैवाभूद्विजानतः ॥
को मोहस्तत्र कः शोक एकत्वमनुपश्यतः ॥ ११ ॥
एष सर्वेषु भूतेषु गूढात्मा न प्रकाशते ॥
दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः ॥१२॥
अनाद्यविद्यया युक्तस्तथाप्येकोऽहमव्ययः ॥
अव्याकृतब्रह्मरूपो जगत्कर्ताहमीश्वरः ॥ १३ ॥
ज्ञानमात्रे यथा दृश्यमिदं स्वप्ने जगत्त्रयम् ॥
तद्वन्मयि जगत्सर्वं दृश्यतेऽस्ति विलीयते ॥ १४ ॥
नानाविद्यासमायुक्तो जीवत्वेन वसाम्यहम् ॥
पञ्च कर्मेन्द्रियाण्येव पञ्च ज्ञानेन्द्रियाणि च ॥ १५ ॥
मनो बुद्धिरहंकारश्चित्तं चेति चतुष्टयम् ॥
वायवः पञ्च मिलिता यान्ति लिङ्गशरीरताम् ॥ १६ ॥
तत्राविद्यासमायुक्तं चैतन्यं प्रतिबिम्बितम् ॥
व्यावहारिकजीवस्तु क्षेत्रज्ञः पुरुषोऽपि च ॥ १७ ॥
स एव जगतां भोक्तानाद्ययोः पुण्यपापयोः ॥
इहामुत्र गती तस्य जाग्रत्स्वप्नादिभोक्तृता ॥ १८ ॥

यथा दर्पणकालिन्ना मलिनं दृश्यते मुखम् ॥
तद्वदन्तःकरणगैर्दोषैरात्मापि दृश्यते ॥ १९ ॥
परस्पराध्यासवशात्स्यादन्तःकरणात्मनोः ॥
एकीभावाभिमानेन परात्मा दुःखभागिव ॥ २० ॥
मरुभूमौ जलत्वेन मध्याह्नार्कमरीचिकाः ॥
दृश्यन्ते मूढचित्तस्य न ह्यार्द्रास्तापकारकाः ॥२१॥
तद्वदात्मापि निर्लेपो दृश्यते मूढचेतसाम् ॥
स्वाविद्यात्मात्मदोषेण कर्तृत्वादिकधर्मवान् ॥ २२ ॥
तत्र चान्नमये पिण्डे हृदि जीवोऽवतिष्ठते ॥
आनखाग्रं व्याप्य देहं तद्ब्रुवेऽवहितः शृणु ॥
सोऽयं तदभिधानेन मांसापण्डो विराजते ॥ २३ ॥
नाभेरूर्ध्वमधः कण्ठाद्व्याप्य तिष्ठति यः सदा ॥
तस्य मध्येऽस्ति हृदयं सनालं पद्मकोशवत् ॥ २४ ॥
अधोमुखं च तत्रास्ति सूक्ष्मं सुषिरमुत्तमम् ॥
दहराकाशमित्युक्तं तत्र जीवोऽवतिष्ठते ॥ २५ ॥
वालाग्रशतभागस्य शतधा कल्पितस्य च ॥
भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते ॥ २६ ॥
कदम्बकुसुमोद्भुद्धकेसरा इव सर्वतः ॥
प्रसृता हृदयान्नाड्यो याभिर्व्याप्तं शरीरकम् ॥ २७ ॥
हितं बलं प्रयच्छन्ति तस्मात्तेन हिताः स्मृताः ॥
द्वासप्ततिसहस्रैस्ताः संख्याता योगवित्तमैः ॥ २८ ॥
हृदयात्तास्तु निष्क्रान्ता यथार्काद्रश्मयस्तथा ॥
एकोत्तरशतं तासु मुख्या विष्वग्विनिर्गताः ॥ २९ ॥
प्रतीन्द्रियं दश दश निर्गता विषयोन्मुखाः ॥
नाड्यः शर्मादिहेतुत्वात् स्वप्नादिफलभुक्तये ॥ ३० ॥
वहन्त्यम्भो यथा नद्यो नाड्यः कर्मफलं तथा ॥

अनन्तैकोर्ध्वगा नाडी मूर्धपर्यन्तमञ्जसा ॥ ३१ ॥
सुषुम्नेति समादिष्टा तया गच्छन्विमुच्यते ॥
तयोपचितचैतन्यं जीवात्मानं विदुर्बुधाः ॥ ३२ ॥
यथा राहुरदृश्योऽपि दृश्यते चन्द्रमण्डले ॥
तद्वत्सर्वगतोऽप्यात्मा लिङ्गदेहे हि दृश्यते ॥ ३३ ॥
दृश्यमाने यथा कुंभे घटाकाशोऽपि दृश्यते ॥
तद्वत्सर्वगतोऽप्यात्मा लिङ्गदेहेऽपि दृश्यते ॥ ३४ ॥
निश्चलः परिपूर्णोऽपि गच्छतीत्युपचर्यते ॥
जाग्रत्काले यथाज्ञेयमभिव्यक्तविशेषधीः ॥ ३५ ॥
व्याप्नोति निष्क्रियः सर्वान् भानुर्दश दिशो यथा ॥
नाडीभिर्वृत्तयो यान्ति लिङ्गदेहसमुद्भवाः ॥ ३६ ॥
तत्तत्कर्मानुसारेण जाग्रद्भोगोपलब्धये ॥
इदं लिङ्गशरीराख्यमामोक्षं न विनश्यति ॥ ३७ ॥
आत्मज्ञानेन नष्टेऽस्मिन्साविद्ये स्वशरीरके ॥
आत्मस्वरूपावस्थानं मुक्तिरित्यभिधीयते ॥ ३८ ॥
उत्पादिते घटे यद्वद्घटाकाशत्वमृच्छति ॥
घटे नष्टे यथाकाशः स्वरूपेणावतिष्ठते ॥ ३९ ॥
जाग्रत्कर्मक्षयवशात्स्वप्नभोग उपस्थिते ॥
बोधावस्थां तिरोधाय देहाद्याश्रयलक्षणाम् ॥ ४० ॥
कर्मोद्भावितसंस्कारस्तत्र स्वप्नरिरंसया ॥
अवस्थां च प्रयात्यन्यां मायावी चात्ममायया ॥ ४१ ॥
घटादिविषयान्सर्वान्बुद्ध्यादिकरणानि च ॥
भूतानि कर्मवशतो वासनामात्रसंस्थितान् ॥ ४२ ॥
एतान् पश्यन् स्वयंज्योतिः साक्ष्यात्मा व्यवतिष्ठते॥४३॥
अत्रान्तःकरणादीनां वासनाद्वासनात्मता ॥
वासनामात्रसाक्षित्वं तेन तच्च परात्मनः ॥ ४४ ॥

वासनाभिः प्रपञ्चोऽत्र दृश्यते कर्मचोदितः ॥
जाग्रद्भूमौ यथा तद्वत्कर्तृकर्मक्रियात्मकः ॥ ४५ ॥
निःशेषबुद्धिसाक्ष्यात्मा स्वयमेव प्रकाशते ॥
वासनामात्रसाक्षित्वं साक्षिणः स्वाप उच्यते ४६ ॥
भूतजन्मनि यद्भूतं कर्म तद्वासनावशात् ॥
नेदीयस्त्वाद्वयस्याद्ये स्वप्नं प्रायः प्रपश्यति ॥ ४७ ॥
मध्ये वयसि कार्कश्यात्करणानामिहार्जितः ॥
वीक्षते प्रायशः स्वप्नं वासनाकर्मणोर्वशात् ॥ ४८ ॥
इयासुः परलोकं तु कर्मविद्यादिसंभृतम् ॥
भाविनो जन्मनो रूपं स्वप्न आत्मा प्रपश्यति ॥ ४९ ॥
यद्वत्प्रपतनाच्छ्येनः श्रान्तो गगनमण्डले ॥
आकुञ्चय पक्षौ यतते नीडे निलयनायनीः ॥ ५० ॥
एवं जाग्रत्स्वप्नभूमौ श्रान्त आत्माभिसंचरन् ॥
आपीतकरणग्रामः कारणेनैति चैकताम् ॥ ५१ ॥
नाडीमार्गैरिन्द्रियाणामाकृष्यादाय वासनाः ॥
सर्वं ग्रसित्वा कार्यं च विज्ञानात्मा विलीयते ॥ ५२ ॥
ईश्वराख्येऽव्याकृतेऽथ यथा सुखमयो भवेत् ॥
कृत्स्नप्रपञ्चविलयस्तथा भवति चात्मनः ॥ ५३ ॥
योषितः काम्यमानायाः संभोगान्ते यथा सुखम् ॥
स आनन्दमयोऽबाह्यो नान्तरः केवलस्तथा ॥ ५४ ॥
प्राज्ञात्मानं समासाद्य विज्ञानात्मा तथैव सः ॥
विज्ञानात्मा कारणात्मा तथा तिष्ठंस्तथापि सः ॥ ५५ ॥
अविद्यासूक्ष्मवृत्त्यानुभवत्येव सुखं यथा ॥
तथाहं सुखमस्वाप्सं नैव किञ्चिदवेदिषम् ॥ ५६ ॥
अज्ञानमपि साक्ष्यादि वृत्तिभिश्चानुभूयते ॥
इत्येवं प्रत्यभिज्ञापि पश्चात्तस्योपजायते ॥ ५७ ॥

जाग्रत्स्वप्नसुषुप्त्याख्यमेवेहामुत्र लोकयोः ॥
पश्चात्कर्मवशादेव विस्फुलिङ्गा यथानलात् ॥
जायन्ते कारणादेव मनोबुद्ध्यादिकानि तु ॥ ५८ ॥
पयःपूर्णो घटो यद्वन्निमग्नः सलिलाशये ॥
तैरेवोद्धृत आयाति विज्ञानात्मा तथैत्यजात् ॥ ५९ ॥
विज्ञानात्मा कारणात्मा तथा तिष्ठंस्तथापि सः ॥
दृश्यते सत्सु तेष्वेव नष्टेष्वायात्यदृश्यताम् ॥ ६० ॥
एकाकारोऽयमा तत्तत्कार्येष्विव परः पुमान् ॥
कूटस्थो दृश्यते तद्वद्गच्छत्यागच्छतीव सः ॥ ६१ ॥
मोहमात्रान्तरायत्वात्सर्वं तस्योपपद्यते ॥
देहाद्यतीत आत्मापि स्वयंज्योतिः स्वभावतः ॥ ६२ ॥
एवं जीवस्वरूपं ते प्रोक्तं दशरथात्मज ॥ ६३ ॥

इति श्रीशिवगीतासु० जीवस्वरूपकथनं नाम दशमोऽध्यायः ॥ १० ॥

श्रीभगवानुवाच ॥ देहान्तरगतिं तस्य परलोकगतिं तथा ॥
वक्ष्यामि नृपशार्दूल मत्तः शृणु समाहितः ॥ १ ॥
भुक्तं पीतं यदस्त्यत्र तद्रसादामबन्धनम् ॥
स्थूलदेहस्य लिङ्गस्य तेन जीवनधारणम् ॥ २ ॥
व्याधिना जरया वापि पीड्यते जाठरोऽनलः॥
श्लेष्मणा तेन भुक्तान्नं पीतं वा न पचत्यलम् ॥ ३ ॥
भुक्तपीतरसाभावादाशु शुष्यन्ति धातवः ॥
भुक्तपीतरसेनैव देहं लिम्पन्ति वायवः ॥ ४ ॥
समीकरोति यस्मात्तत्समानो वायुरुच्यते ॥
तदानीं तद्रसाभावादामबन्धनहानितः ॥ ५ ॥
परिपक्करसत्वेन यथा गौरवतः फलम् ॥
स्वयमेव पतत्याशु तथा लिङ्गं तनोर्व्रजेत् ॥ ६ ॥

तत्तस्थानादपाकृष्य हृषीकाणां च वासनाः ॥
आध्यात्मिकाधिभूताने हृत्पद्मे चैकतां गतः ॥ ७ ॥
तदोर्ध्वगः प्राणवायुः संयुक्तो नववायुभिः ॥
ऊर्ध्वोच्छ्वासी भवत्येष तथा तेनैकतां गतः ॥ ८ ॥
चक्षुषो वाथ मूर्ध्नो वा नाडीमार्गं समाश्रितः ॥
विद्याकर्मसमायुक्तो वासनाभिश्च संयुतः ॥
प्राज्ञात्मानं समाश्रित्य विज्ञानात्मोपसर्पति ॥ ९ ॥
यथा कुम्भो नीयमानो देशादेशान्तरं प्रति ॥
खपूर्ण एव सर्वत्र स आकाशोऽपि तत्र तु ॥ १० ॥
घटाकाशाख्यतां याति तद्वल्लिङ्गं परात्मनः ॥ ११ ॥
पुनर्देहान्तरं याति यथा कर्मानुसारतः ॥
आमोक्षात्संचरत्येवं मत्स्यः कूलद्वयं यथा ॥ १२ ॥
पापभोगाय चेद्गच्छेद्यमदूतैरधिष्ठितः ॥
यातनादेहमाश्रित्य नरकानेव केवलम् ॥ १३ ॥
इष्टापूर्तादिकर्माणि योऽनुतिष्ठति सर्वदा ॥
पितृलोकं व्रजत्येष धूममाश्रित्य बर्हिषः ॥ १४ ॥
धूमाद्रात्रिं ततः कृष्णपक्षं तस्माच्च दक्षिणम् ॥
अयनं च ततो लोकं पितॄणां च ततः परम् ॥
चन्द्रलोके दिव्यदेहं प्राप्य भुंक्ते परां श्रियम् ॥ १५ ॥
तत्र चन्द्रमसा सोऽसौ यावत्कर्मफलं वसेत् ॥
तथैव कर्मशेषेण यथेतं पुनरावृजेत् ॥ १६ ॥
वपुर्विहाय जीवत्वमासाद्याकाशमेति सः ॥
आकाशाद्वायुमागत्य वायोरम्भो व्रजत्यथ ॥ १७ ॥
अद्भ्यो मेघं समासाद्य ततो वृष्टिर्भवेदसौ ॥
ततो धान्यानि भक्ष्याणि जायते कर्मचोदितः ॥ १८ ॥
योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः ॥

मुक्तिमन्येऽनुसंयान्ति यथाकर्म यथाश्रुतम् ॥ १९ ॥
ततोऽन्नत्वं समासाद्य पितृभ्यां भुज्यते परम् ॥
ततः शुक्रं रजश्चैव भूत्वा गर्भोऽभिजायते ॥ २० ॥
ततः कर्मानुसारेण भवेत्स्त्रीपुन्नपुंसकः ॥
एवं जीवगतिः प्रोक्ता मुक्तिं तस्य वदामि ते ॥ २१ ॥
यस्तु शान्त्यादियुक्तः सन्सदा विद्यारतो भवेत् ॥
स याति देवयानेन ब्रह्मलोकावधिं नरः ॥ २२ ॥
अर्चिर्भूत्वा दिनं प्राप्य शुक्लपक्षमथो व्रजेत् ॥
उत्तरायणमासाद्य संवत्सरमथो व्रजेत् ॥ २३ ॥
आदित्यचन्द्रलोकौ तु विद्युल्लोकमतः परम् ॥
अथ दिव्यः पुमान्कश्चिद्ब्रह्मलोकादहेति भः ॥ २४ ॥
दिव्ये वपुषि संधाय जीवमेवं नयत्यसौ ॥ २५ ॥
ब्रह्मलोके दिव्यदेहे भुक्त्वा भोगान्यथेप्सितान् ॥
तत्रोषित्वा चिरं कालं ब्रह्मणा सह मुच्यते ॥ २६ ॥
शुद्धब्रह्मरतो यस्तु न स यात्येव कुत्रचित् ॥
तस्य प्राणा विलीयन्ते जले सैन्धवखिल्यवत् ॥ २७ ॥
स्वप्नदृष्टा यथा सृष्टिः प्रबुद्धस्य विलीयते ॥
ब्रह्मज्ञानवतस्तद्वद्विलीयन्ते तदैव ते ॥
विद्याकर्मविहीनो यस्तृतीयं स्थानमेति सः ॥ २८ ॥
भुक्त्वा च नरकान्घोरान्महारौरवरौरवान् ॥
पश्चात्प्राक्तनशेषेण क्षुद्रजन्तुर्भवेदसौ ॥ २९ ॥
यूकामशकदंशादि जन्मासौ लभते भुवि ॥
एवं जीवगतिः प्रोक्ता किमन्यच्छ्रोतुमिच्छसि ॥ ३० ॥

श्रीराम उवाच ॥ भगवन्यत्त्वया प्रोक्तं फलं तज्ज्ञानकर्मणोः ॥
ब्रह्मलोके चंद्रलोके भुङ्क्ते भोगानिति प्रभो ॥ ३१ ॥
गन्धर्वादिषु लोकेषु कथं भोगः समीरितः ॥

देवत्वं प्राप्नुयात्काश्चित्काश्चिदिन्द्रत्वमेति च ॥ ३२ ॥
एतत्कर्मफलं वास्तु विद्याफलमथापि वा ॥
तद्ब्रूहि गिरिजाकान्त तत्र मे संशयो महान् ॥ ३३ ॥
श्रीभगवानुवाच ॥ तद्विद्याकर्मणोरेवानुसारेण फलं भवेत् ॥
युवा च सुन्दरः शूरो नीरोगो बलवान् भवेत् ॥ ३४ ॥
सप्तद्वीपां वसुमतीं भुङ्क्ते निष्कण्टकं यदि ॥
स प्रोक्तो मानुषानन्दस्तस्माच्छतगुणो मतः ॥ ३५ ॥
मनुष्यस्तपसा युक्तो गन्धर्वो जायतेऽस्य तु ॥
तस्माच्छतगुणो देवगन्धर्वाणां न संशयः ॥ ३६ ॥
एवं शतगुणानन्द उत्तरोत्तरतो भवेत् ॥
पितॄणां चिरलोकानामाजानसुरसंपदाम् ॥ ३७ ॥
देवतानामथेन्द्रस्य गुरोस्तद्वत्प्रजापतेः ॥
ब्रह्मणश्चैवमानन्दः पुरस्तादुत्तरोत्तरः ॥ ३८ ॥
ज्ञानाधिक्यात्सुखाधिक्यं नान्यदस्ति सुरालये ॥
श्रोत्रियोऽवृजिनोऽकामहतो यश्च द्विजो भवेत् ॥ ३९ ॥
तस्याप्येवं समाख्याता आनन्दाश्चोत्तरोत्तरम् ॥
आत्मज्ञानात्परं नास्ति तस्मादशरथात्मज ॥ ४० ॥
ब्राह्मणः कर्मभिर्नैव वर्धते नैव हीयते ॥
न लिप्यते पातकेन कर्मणा ज्ञानवान्यदि ॥ ४१ ॥
तस्मात्सर्वाधिको विप्रो ज्ञानवानेव जायते ॥
ज्ञात्वा यः कुरुते कर्म तस्याक्षय्यफलं भवेत् ॥ ४२ ॥
यत्फलं लभते मर्त्यः कोटिब्राह्मणभोजनैः॥
तत्फलं समवाप्नोति ज्ञानिनं यस्तु भोजयेत् ॥ ४३ ॥
ज्ञानवन्तं द्विजं यस्तु द्विषते च नराधमः ॥
स शुष्यमाणो म्रियते यस्मादीश्वर एव सः ॥ ४४ ॥
उपासको न यात्येव यस्मात्पुनरधोगतिम् ॥

उपासनरतो भूत्वा तस्मादास्व सुखी नृप ॥ ४५ ॥
इति श्रीशिवगीतासु० जीवँगत्यादिनिरूपणं नामैकादशोऽध्यायः ॥११॥

श्रीराम उवाच ॥ भगवन्देवदेवेश नमस्तेऽस्तु महेश्वर ॥
उपासनविधिं ब्रूहि देशं कालं च तस्य तु ॥ १ ॥
अङ्गानि नियमांश्चैव मयि तेऽनुग्रहो यदि ॥
ईश्वर उवाच ॥ शृणु राम प्रवक्ष्यामि देशं कालमुपासने॥ २ ॥
सर्वाकारोऽहमेवैकः सच्चिदानन्दविग्रहः ॥
मदंशेन परिच्छिन्ना देहाः सर्वदिवौकसाम् ॥ ३ ॥
ये त्वन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः ॥
तेऽपि मामेव राजेन्द्र यजन्त्यविधिपूर्वकम् ॥ ४ ॥
यस्मात्सर्वमिदं विश्वं मत्तो न व्यतिरिच्यते ॥
सर्वक्रियाणां भोक्ताहं सर्वस्याहं फलप्रदः ॥ ५ ॥
येनाकारेण ये मर्त्या मामेवैकमुपासते ॥
तेनाकारेण तेभ्योऽहं प्रसन्नो वाञ्छितं ददे ॥ ६ ॥
विधिनाऽविधिना वापि भक्त्या ये मामुपासते ॥
तेभ्यः फलं प्रयच्छामि प्रसन्नोऽहं न संशयः ॥ ७ ॥
अपि चेत्सुदुराचारो भजते मामनन्यभाक् ॥
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥ ८ ॥
स्वजीवत्वेन यो वेत्ति मामेवैकमनन्यधीः ॥
तं न स्पृशन्ति पापानि ब्रह्महत्यादिकान्यपि ॥ ९ ॥
उपासाविधयस्तत्र चत्वारः परिकीर्तिताः ॥
संपदारोपसंवर्गाध्यासा इति मनीषिभिः ॥ १० ॥
अल्पस्य चाधिकत्वेन गुणयोगाद्विचिन्तनम् ॥
अनन्तं वै मन इति संपद्विधिरुदीरितः ॥ ११ ॥
विधावारोप्य योपासा सारोपः परिकीर्तितः ॥

यद्वदोङ्कारमुद्गीथमुपासीतेत्युदाहृतः ॥ १२ ॥
आरोपो बुद्धिपूर्वेण य उपासाविधिश्च सः ॥
योषित्यग्निमतिर्यत्तदध्यासः स उदाहृतः ॥ १३ ॥
क्रियायोगेन चोपासाविधेः संवर्ग उच्यते ॥
संवर्तवायुः प्रलये भूतान्येकोऽवसीदति ॥ १४ ॥
उपसंगम्य बुद्ध्या यदासनं देवतात्मना ॥
तदुपासनमन्तः स्यात्तद्बहिः संपदादयः ॥ १५ ॥
ज्ञानान्तरानन्तरितसजातिज्ञानसंहतेः ॥
संपन्नदेवतात्मत्वमुपासनमुदीरितम् ॥ १६ ॥
संपदादिषु वाह्येषु दृढबुद्धिरुपासनम् ॥
कर्मकाले तदङ्गेषु दृष्टिमात्रमुपासनम् ॥
उपासनमिति प्रोक्तं तदङ्गानि ब्रुवे शृणु ॥ १७ ॥
तीर्थक्षेत्रादिगमनं श्रद्धां तत्र परित्यजेत् ॥
स्वचित्तैकाग्रता यत्र तत्रासीत सुखं द्विजः ॥ १८ ॥
कम्बले मृदुतल्पे वा व्याघ्रचर्मणि वास्थितः ॥
विविक्तदेशे नियतः समग्रीवशिरस्तनुः ॥ १९ ॥
अत्याश्रमस्थः सकलानीन्द्रियाणि निरुध्य च ॥
भक्त्याथ स्वगुरुं नत्वा योगं विद्वान्प्रयोजयेत् ॥ २० ॥
यस्त्वविज्ञानवान्भवत्ययुक्तमनसा सदा ॥
तस्येन्द्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः ॥ २१ ॥
विज्ञानी यस्तु भवति युक्तेन मनसा सदा ॥
तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः ॥ २२ ॥
यस्त्वविज्ञानवान् भवत्यमनस्कः सदाऽशुचिः ॥
न स तत्पदमाप्नोति संसारमधिगच्छति ॥ २३ ॥
विज्ञानी यस्तु भवति समनस्कः सदा शुचिः ॥
दमवाप्नोति यस्माद्भूयो न जायते ॥ २४ ॥

विज्ञानसारथिर्यस्तु मनःप्रग्रह एव च ॥
सोऽध्वनः पारमाप्नोति ममैव परमं पदम् ॥ २५ ॥
हृत्पुण्डरीकं विरजं विशुद्धं विशदं तथा ॥
विशोकं च विचिन्त्यात्र ध्यायेन्मां परमेश्वरम् ॥ २६ ॥
अचिन्त्यरूपमव्यक्तमनन्तममृतं शिवम् ॥
आदिमध्यान्तरहितं प्रशान्तं ब्रह्म कारणम् ॥ २७ ॥
एकं विभुं चिदानन्दमरूपमजमद्भुतम् ॥
शुद्धस्फटिकसंकाशमुमादेहार्धधारिणम् ॥ २८ ॥
व्याघ्रचर्माम्बरधरं नीलकण्ठं त्रिलोचनम् ॥
जटाधरं चन्द्रमौलिं नागयज्ञोपवीतिनम् ॥ २९ ॥
व्याघ्रचर्मोत्तरीयं च वरेण्यमभयप्रदम् ॥
पराभ्यामूर्ध्वहस्ताभ्यां बिभ्राणं परशुं मृगम् ॥ ३० ॥
कोटिमध्याह्नसूर्याभं चन्द्रकोटिसुशीतलम् ॥
चन्द्रसूर्याग्निनयनं स्मेरवक्त्रसरोरुहम् ॥ ३१ ॥
भूतिभूषितसर्वाङ्गं सर्वाभरणभूषितम् ॥
एवमात्मारणिं कृत्वा प्रणवं चोत्तरारणिम् ॥
ध्याननिर्मथनाभ्यासात्साक्षात्पश्यति मां जनः ॥ ३२ ॥
वेदवाक्यैरलभ्योऽहं न शास्त्रैर्नापि चेतसा ॥
ध्यानेन वृणुते यो मां सर्वदाहं वृणोमि तम् ॥ ३३ ॥
नाविरतो दुश्चरितान्नाशान्तो नासमाहितः ॥
नाशान्तमानसो वापि प्रज्ञानेन लभेत माम् ॥ ३४ ॥
जाग्रत्स्वप्नसुषुप्त्यादिप्रपञ्चो यः प्रकाशते ॥
तद्ब्रह्माहमिति ज्ञात्वा सर्वबन्धैः प्रमुच्यते ॥ ३५ ॥
त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत् ॥
तज्ज्योतिर्लक्षणः साक्षी चिन्मात्रोऽहं सदाशिवः ॥ ३६ ॥
एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा ॥

सर्वाध्यक्षःसर्वभूताधिवासःसाक्षी चेता केवलो निर्गुणश्च
एको वशी सर्वभूतान्तरात्माप्येकं बीजं नित्यदा यः
करोति ॥ तं मां नित्यं येऽनुपश्यन्ति धीरास्तेषां शांतिः
शाश्वती नेतरेषाम् ॥ ३८ ॥
अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव ॥
एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन
बाह्यः ॥ ३९ ॥
वेदेह यो मां पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् ॥
स एव विद्वानमृतोऽत्र भूयान्नान्यस्तु पन्था अयनाय
विद्यते ॥ ४० ॥
हिरण्यगर्भं विदधामि पूर्वं वेदांश्च तस्मै प्रहिणोमि योऽहम् ।
तं देवमीड्यं पुरुषं पुराणं निश्चित्य मां मृत्युमुखात्प्रमुच्यते
एवं शान्त्यादियुक्तः सन्वेत्ति मां तत्त्वतस्तु यः ॥
निर्मुक्तदुःखसंतानः सोऽन्ते मय्येव लीयते ॥ ४२ ॥

॥ इति श्रीशिवगीतासु० उपासनाज्ञानफलं नाम द्वादशोऽध्यायः ॥ १२ ॥

सूत उवाच ॥ एवं श्रुत्वा कौसलेयस्तुष्टो मतिमतां वरः ॥
पप्रच्छ गिरिजाकान्तं सुभगं मुक्तिलक्षणम् ॥ १ ॥
श्रीराम उवाच ॥ भगवन्करुणाविष्टहृदय त्वं प्रसीद मे ॥
स्वरूपलक्षणं मुक्तेः प्रब्रूहि परमेश्वर ॥ २ ॥
श्रीभगवानुवाच ॥ सालोक्यमपि सारूप्यं साष्टर्यं सायुज्यमेव च
कैवल्यं चेति तां विद्धि मुक्तिं राघव पञ्चधा ॥ ३ ॥
मां पूजयति निष्कामः सर्वदा ज्ञानवर्जितः ॥
स मे लोकं समासाद्य भुङ्क्ते भोगान्यथेप्सितान् ॥ ४ ॥
ज्ञात्वा मां पूजयेद्यस्तु सर्वकामविवर्जितः ॥
मया समानरूपः सन्मम लोके महीयते ॥ ५ ॥

इष्टापूर्तादिकर्माणि मत्प्रीत्यै कुरुते तु यः ॥
यत्करोति यदश्नाति यज्जुहोति ददाति यत् ॥ ६ ॥
यत्तपस्यति तत्सर्वं यः करोति मदर्पणम् ॥
मल्लोके स श्रियं भुङ्क्ते मत्तुल्यं प्राभवं भजेत् ॥ ७ ॥
यस्तु शान्त्यादियुक्तः सन्मामात्मत्वेन पश्यति ॥
स जायते परं ज्योतिरद्वैतं ब्रह्म केवलम् ॥
आत्मस्वरूपावस्थानं मुक्तिरित्यभिधीयते ॥ ८ ॥
सत्यं ज्ञानमनन्तं सदानन्दं ब्रह्म केवलम् ॥
सर्वधर्मविहीनं च मनोवाचामगोचरम् ॥ ९ ॥
सजातीयविजातीयपदार्थानामसंभवात् ॥
अतस्तद्व्यतिरिक्तानामद्वैतामिति संज्ञितम् ॥ १० ॥
मत्वा रूपमिदं राम शुद्धं यदभिधीयते ॥
मय्येव दृश्यते सर्वं जगत्स्थावरजङ्गमम् ॥ ११ ॥
व्योम्नि गन्धर्वनगरं यथा दृष्टं न दृश्यते ॥
अनाद्यविद्यया विश्वं सर्वं मय्येव कल्प्यते ॥ १२ ॥
मम स्वरूपज्ञानेन यदाऽविद्या प्रणश्यति ॥
तदैक एव वर्त्तेऽहं मनोवाचामगोचरः ॥ १३ ॥
सदैव परमानन्दः स्वप्रकाशश्चिदात्मकः ॥
न कालः पञ्चभूतानि न दिशो विदिशश्च न ॥ १४ ॥
मदन्यन्नास्ति यत्किञ्चित्तदा वर्त्तेऽहमेकलः ॥ १५ ॥
न संदृशे तिष्ठति मे स्वरूपं न चक्षुषा पश्यति मां तु कश्चित्।
हृदा मनीषा मनसाभिक्लृप्तं ये मां विदुस्ते ह्यमृता भवन्ति
श्रीराम उवाच ॥ कथं भगवतो ज्ञानं शुद्धं मर्त्यस्य जायते ॥
तत्रोपायं हर ब्रूहि मयि तेऽनुग्रहो यदि ॥ १७ ॥
श्रीभगवानुवाच ॥ विरज्य सर्वभूतेभ्य आविरिंचिपदादपि ॥
घृणां वितत्य सर्वत्र पुत्रमित्रादिकेष्वपि ॥ १८ ॥

श्रद्धालुर्भक्तिमार्गेषु वेदान्तज्ञानलिप्सया ॥
उपायनकरो भूत्वा गुरुं ब्रह्मविदं व्रजेत् ॥ १९ ॥
सेवाभिः परितोष्यैनं चिरकालं समाहितः ॥
सर्ववेदान्तवाक्यार्थं शृणुयात्सुसमाहितः ॥ २० ॥
सर्ववेदान्तवाक्यानां मयि तात्पर्यनिश्चयम् ॥
श्रवणं नाम तत्प्राहुः सर्वे ते ब्रह्मवादिनः ॥ २१ ॥
लोहमण्यादिदृष्टान्तयुक्तिभिर्यद्विचिन्तनम् ॥
तदेव मननं प्राहुर्वाक्यार्थस्योपबृंहणम् ॥ २२ ॥
निर्ममो निरहंकारः समः संगविवर्जितः ॥
सदा शान्त्यादियुक्तः सन्नात्मन्यात्मानमीक्षते ॥ २३ ॥
यत्सदा ध्यानयोगेन तन्निदिध्यासनं स्मृतम् ॥ २४ ॥
सर्वकर्मक्षयवशात्साक्षात्कारोऽपि चात्मनः ॥
कस्यचिज्जायते शीघ्रं चिरकालेन कस्यचित् ॥ २५ ॥
कूटस्थानीह कर्माणि कोटिजन्मार्जितान्यपि ॥
ज्ञानेनैव विनश्यन्ति न तु कर्मायुतैरपि ॥ २६ ॥
ज्ञानादूर्ध्वं तु यत्किञ्चित्पुण्यं वा पापमेव वा ॥
क्रियते बहु वाल्पं वा न तेनायं विलिप्यते ॥ २७ ॥
शरीरारम्भकं यत्तु प्रारब्धं कर्म जन्मिनः ॥
तद्भोगेनैव नष्टं स्यान्न तु ज्ञानेन नश्यति ॥ २८ ॥
निर्मोहो निरहंकारो निर्लेपः संगवर्जितः ॥
सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि ॥
यः पश्यन्संचरत्येष जीवन्मुक्तोऽभिधीयते ॥ २९ ॥
अहिनिर्व्वयिनी यद्वद्द्रष्टुः पूर्वं भयप्रदा ॥
ततोऽस्य न भयं किंचित्तद्वद्द्रष्टुरयं जनः ॥ ३० ॥
यदा सर्वे प्रमुच्यन्ते कामा येऽस्य वशं गताः ॥
अथ मर्त्योऽमृतो भवत्येतावदनुशासनम् ॥ ३१ ॥

मोक्षस्य न हि वासोऽस्ति न ग्रामान्तरमेव वा ॥
अज्ञानहृदयग्रन्थिनाशो मोक्ष इति स्मृतः ॥ ३२ ॥
वृक्षाग्रच्युतपादो यः स तदैव पतत्यधः ॥
तद्वज्ज्ञानवतो मुक्तिर्जायते निश्चितापि तु ॥ ३३ ॥
तीर्थे चाण्डालगेहे वा यदि वा नष्टचेतनः ॥
परित्यजन्देहमिमं ज्ञानादेव विमुच्यते ॥ ३४ ॥
संवीतो येन केनाश्नन्भक्ष्यं वाभक्ष्यमेव वा ॥
शयानो यत्र कुत्रापि सर्वात्मा मुच्यतेऽत्र सः ॥ ३५ ॥
क्षीरादुद्धृतमाज्यं तत्क्षिप्तं पयसि तत्पुनः ॥
न तेनैक्यतां याति संसारे ज्ञानवांस्तथा ॥ ३६ ॥
नित्यं पठति योऽध्यायमिमं राम शृणोति वा ॥
स मुच्यते देहबन्धादनायासेन राघव ॥ ३७ ॥
अतः संयतचित्तस्त्वं नित्यं पठ महीपते ॥
अनायासेन तेनैव सर्वथा मोक्षमाप्स्यसि ॥ ३८ ॥

॥ इति श्रीशिवगीतासु० मोक्षयोगो नाम चतुर्दशोऽध्यायः ॥ १४ ॥

श्रीराम उवाच ॥ भगवन्यदि ते रूपं सच्चिदानन्दविग्रहम् ॥
निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम् ॥ १ ॥
सर्वधर्मविहीनं च मनोवाचामगोचरम् ॥
सर्वव्यापितयात्मानमीक्षते सर्वतः स्थितम् ॥ २ ॥
आत्मविद्यातपोमूलं तद्ब्रह्मोपनिषत्परम् ॥
अमूर्तं सर्वभूतात्माकारं कारणकारणम् ॥ ३ ॥
यत्तददृश्यमग्राह्यं तदग्राह्यं वा कथं भवेत् ॥
अत्रोपायमजानानस्तेन खिन्नोऽस्मि शंकर ॥ ४ ॥
श्रीभगवानुवाच ॥ शृणु राजन्प्रवक्ष्यामि तत्रोपायं महाभुज ॥
सगुणोपासनाभिस्तु चित्तैकाग्र्यं विधाय च ॥ ५ ॥

स्थूलसौरांभिकान्यायात्तत्र चित्तं प्रवर्तयेत् ॥
तस्मिन्नन्नमये पिण्डे स्थूलदेहे तनूभृताम् ॥ ६ ॥
जन्मव्याधिजरामृत्युनिलये वर्तते दृढा ॥ ७ ॥
आत्मबुद्धिरहंमानात्कदाचिन्नैव हीयते ॥
आत्मा न जायते नित्यो म्रियते वा कथंचन ॥ ८ ॥
संजायतेऽस्ति विपरिणमते वर्धते तथा ॥
क्षीयते नश्यतीत्येते षड्भावा वपुषः स्मृताः ॥ ९ ॥
आत्मनो न विकारित्वं घटस्थनभसो यथा ॥
एवमात्मावपुस्तस्मादिति संचिन्तयेद्बुधः ॥ १० ॥
मूषानिक्षिप्तहेमाभः कोशः प्राणमयोऽत्र तु ॥
वर्ततेऽन्तरतो देहे बद्धः प्राणादिवायुभिः ॥ ११ ॥
कर्मेन्द्रियैः समायुक्तश्चलनादिक्रियात्मकः ॥
क्षुत्पिपासापराभूतो नायमात्मा जडो यतः ॥ १२ ॥
चिद्रूप आत्मा येनैव स्वदेहमभिपश्यति ॥
आत्मैव हि परं ब्रह्म निर्लेपः सुखनीरधिः ॥ १३ ॥
न तदश्नाति किंचैतत्तदश्नाति न कश्चन ॥ १४ ॥
ततः प्राणमये कोशे कोशोऽस्त्येव मनोमयः ॥
स संकल्पविकल्पात्मा बुद्धीन्द्रियसमायुतः ॥ १५ ॥
कामः क्रोधस्तथा लोभो मोहो मात्सर्यमेव च ॥
मदश्चेत्यरिषड्वर्गो ममतेच्छादयोऽपि च ॥
मनोमयस्य कोशस्य धर्मा एतस्य तत्र तु ॥ १६ ॥
या कर्मविषया बुद्धिर्वेदशास्त्रार्थनिश्चिता ॥
सा तु ज्ञानेन्द्रियैः सार्धं विज्ञानमयकोशतः ॥ १७ ॥
इह कर्तृत्वाभिमानी स एव तु न संशयः ॥
इहामुत्र गतिस्तस्य स जीवो व्यावहारिकः ॥ १८ ॥
व्योमादिसात्त्विकांशेभ्यो जायन्ते धान्द्रयाणि तु ॥

व्योम्नः श्रोत्रं भुवो घ्राणं जलाज्जिह्वाथ तेजसः॥ १९ ॥
चक्षुर्वायोस्त्वगुत्पन्ना तेषां भौतिकता ततः ॥ २० ॥
व्यामोदीनां समस्तानां सात्त्विकांशेभ्य एव तु ॥
जायंते बुद्धिमनसी बुद्धिः स्यान्निश्चयात्मिका ॥ २१ ॥
वाक्पाणिपादपायूपस्थानि कर्मेंद्रियाणि तु ॥
व्योमादीनां रजोंऽशेभ्यो व्यस्तेभ्यस्तान्यनुक्रमात् ।२२।
समस्तेभ्यो रजोंऽशेभ्यः पञ्च प्राणादिवायवः ॥
जायन्ते सप्तदशकमेवं लिङ्गशरीरकम् ॥ २३ ॥
एतल्लिंगशरीरं तु तन्मायःपिण्डवद्व्रतः ॥
परस्पराध्यासयोगात्साक्षिचैतन्यसंयुतम् ॥ २४ ॥
तदानन्दमयः कोशो भोक्तृत्वं प्रतिपद्यते ॥
विद्याकर्मफलादीनां भोक्तेहामुत्र स स्मृतः॥ २५ ॥
यदाध्यासं विहायैष स्वस्वरूपेण तिष्ठति ॥
अविद्यामात्रसंयुक्तः साक्ष्यात्मा जायते तदा ॥ २६ ॥
द्रष्टान्तःकरणादीनामनुभूतेः स्मृतेरपि ॥
अतोऽन्तःकरणाध्यासादध्यासित्वेन चात्मनः ॥
भोक्तृत्वं साक्षिता चेति द्वैधं तस्योपपद्यते ॥ २७ ॥
आतपश्चापि तच्छाया तत्प्रकाशे विराजते ॥
एको भोजयिता तत्र भुङ्क्तेऽन्यः कर्मणः फलम् ॥ २८॥
क्षेत्रज्ञं रथिनं विद्धि शरीरं रथमेव तु ॥
बुद्धिं तु सारथिं विद्धि प्रग्रहं तु मनस्तथा ॥ २९ ॥
इन्द्रियाणि हयान्विद्धि विषयांस्तेषु गोचरान् ॥
इन्द्रियैर्मनसा युक्तं भोक्तारं विद्धि पूरुषम् ॥ ३० ॥
एवं शान्त्यादियुक्तः सन्नुपास्ते यः सदा द्विजः ॥
उद्धाट्योद्घाट्यैकमेकं यथैव कदलीतरोः ॥ ३१ ॥
वल्कलानि ततः पश्चाल्लभते सारमुत्तमम् ॥

तथैव पञ्चकोशेषु मनः संक्रामयन्क्रमात् ॥
तेषां मध्ये ततः सारमात्मानमपि विन्दति ॥ ३२ ॥
एवं मनः समाधाय संयतो मनसि द्विजः ॥
अथ प्रवर्तयेच्चित्तं निराकारे परात्मनि ॥ ३३ ॥
ततो मनः प्रगृह्णाति परमात्मानमव्ययम् ॥
यत्तदद्रेश्यमग्राह्यमस्थूलाद्युक्तिगोचरम् ॥ ३४ ॥
श्रीराम उवाच ॥ भगवञ्छ्रवणे नैव प्रवर्तन्ते जनाः कथम् ॥
वेदशास्त्रार्थसंपन्ना यज्वानः सत्यवादिनः ॥ ३५ ॥
शृण्वन्तोऽपि तथात्मानं जानते नैव केचन ॥
ज्ञात्वापि मन्वते मिथ्या किमेतत्तव मायया ॥ ३६ ॥
श्रीभगवानुवाच ॥ एवमेव महाबाहो नात्र कार्या विचारणा ॥
दैवी ह्येषा गुणमयी मम माया दुरत्यया ॥ ३७ ॥
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥
अभक्ता ये महाबाहो मम श्रद्धाविवर्जिताः ॥ ३८ ॥
फलं कामयमानास्ते चैहिकामुष्मिकादिकम् ॥
क्षयिष्ण्वल्पं सातिशयं यतः कर्मफलं मतम् ॥ ३९ ॥
तदविज्ञाय कर्माणि ये कुर्वन्ति नराधमाः ॥
मातुः पतन्ति ते गर्भे मृत्योर्वक्त्रे पुनः पुनः ॥ ४० ॥
नानायोनिषु जातस्य देहिनो यस्यकस्यचित् ॥
कोटिजन्मार्जितैः पुण्यैर्मयि भक्तिः प्रजायते ॥ ४१ ॥
स एव लभते ज्ञानं मद्भक्तः श्रद्धयान्वितः ॥
नान्यकर्माणि कुर्वाणो जन्मकोटिशतैरपि ॥ ४२ ॥
ततः सर्वं परित्यज्य मद्भक्तिं समुदाहर ॥
सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ॥ ४३ ॥
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥
यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ॥ ४४ ॥

यत्तपस्यसि राम त्वं तत्कुरुष्व मदर्पणम् ॥
ततः परतरा नास्ति भक्तिर्मयि रघूत्तम ॥ ४५ ॥
॥ इति श्रीशिवगीतासु० पञ्चकोशोपपादनं नाम चतुर्दशोऽध्यायः ॥१४॥

श्रीराम उवाच ॥ भक्तिस्ते कीदृशी देव जायते वा कथंचन ॥
यया निर्वाणरूपं तु लभते मोक्षमुत्तमम् ॥
तद् ब्रूहि गिरिजाकान्त मयि तेऽनुग्रहो यदि ॥ १ ॥
श्रीभगवानुवाच ॥ यो वेदाध्ययनं यज्ञं दानानि विविधानि च ॥
मदर्पणधिया कुर्यात्स मे भक्तः स मे प्रियः ॥ २ ॥
नर्यभस्म समादाय विशुद्धं श्रोत्रियालयात् ॥
अग्निरित्यादिभिर्मन्त्रैरभिमन्त्र्य यथाविधि ॥ ३ ॥
उद्धूलयति गात्राणि तेन चार्चति मामपि ॥
तस्मात्परतरा भक्तिर्मम राम न विद्यते ॥ ४ ॥
सर्वदा शिरसा कण्ठे रुद्राक्षान्धारयेत्तु यः ॥
पञ्चाक्षरीजपरतः स मे भक्तः स मे प्रियः ॥ ५ ॥
भस्मच्छन्नो भस्मशायी सर्वदा विजितेन्द्रियः ॥
यस्तु रुद्रं जपेन्नित्यं चिन्तयेन्मामनन्यधीः ॥ ६ ॥
स तेनैव च देहेन शिवः संजायते स्वयम् ॥
जपेद्यो रुद्रसूक्तानि तथाथर्वशिरः परम् ॥ ७ ॥
कैवल्योपनिषत्सूक्तं श्वेताश्वतरमेव च ॥
ततः परतरो भक्तो मम लोके न विद्यते ॥ ८ ॥
अन्यत्र धर्मादन्यस्मादन्यत्रास्मात्कृताकृतात् ॥
अन्यत्र भूताद्भव्याच्च यत्प्रवक्ष्यामि तच्छृणु ॥ ९ ॥
वदन्ति यत्पदं वेदाः शास्त्राणि विविधानि च ॥
सर्वोपनिषदां सारं दध्नो घृतमिवोद्धृतम् ॥ १० ॥
यदिच्छन्तो ब्रह्मचर्यं चरन्ति मुनयः सदा ॥

तत्ते पदं संग्रहेण ब्रवीम्योमिति यत्पदम् ॥ ११ ॥
एतदेवाक्षरं ब्रह्म एतदेवाक्षरं परम् ॥
एतदेवाक्षरं ज्ञात्वा ब्रह्मलोके महीयते ॥ १२ ॥
छन्दसां यस्तु धेनूनामृषभत्वेन चोदितः ॥
इदमेव पतिः सेतुरमृतस्य च धारणात् ॥ १३ ॥
मेदसा पिहिते कोशे ब्रह्म यत्परमोमिति ॥ १४ ॥
चतस्रस्तस्य मात्राः स्युरकारोकारकौ तथा ॥
मकारश्चावसानेऽर्धमात्रेति परिकीर्तिता ॥ १५ ॥
पूर्वत्र भूश्च ऋग्वेदो ब्रह्माष्टवसवस्तथा ॥
गार्हपत्यश्च गायत्री गङ्गा प्रातःसवस्तथा ॥ १६ ॥
द्वितीया च भुवो विष्णू रुद्रोऽनुष्टुब्यजुस्तथा ॥
यमुनादक्षिणाग्निश्च माध्यन्दिनसवस्तथा ॥ १७ ॥
तृतीया च सुवः सामान्यादित्यश्च महेश्वरः ॥
अग्निराहवनीयश्च जगती च सरस्वती ॥ १८ ॥
तृतीयं सवनं प्रोक्तमथर्वत्वेन यन्मतम् ॥
चतुर्थी यावसानेऽर्धमात्रा सा सोमलोकगा ॥ १९ ॥
अथर्वाङ्गिरसः संवर्तकोऽग्निश्च महस्तथा ॥
विराट् सभ्यावसथ्यौ च शुतुद्रिर्यज्ञपुच्छकः ॥ २० ॥
प्रथमा रक्तवर्णा स्याद् द्वितीया भास्वरा मता ॥
तृतीया विद्युदाभा स्याच्चतुर्थी शुक्लवर्णिनी ॥ २१ ॥
सर्वं जातं जायमानं तदोङ्कारे प्रतिष्ठितम् ॥
विश्वं भूतं च भुवनं विचित्रं बहुधा तथा ॥ २२ ॥
जातं च जायमानं यत्तत्सर्वं रुद्र उच्यते ॥
तस्मिन्नेव पुनः प्राणाः सर्वमोङ्कार उच्यते ॥ २३ ॥
प्रविलीनं तदोङ्कारे परं ब्रह्म सनातनम् ॥
तस्मादोङ्कारजापी यः स मुक्तो नात्र संशयः ॥२४॥

त्रेताग्नेः स्मार्तवह्नेर्वा शैवाग्नेर्वा समाहृतम् ॥
भस्माभिमन्त्र्य यो मां तु प्रणवेन प्रपूजयेत् ॥ २५ ॥
तस्मात्परतरो भक्तो मम लोके न विद्यते ॥ २६ ॥
शालाग्नेर्दाववह्नेर्वा भस्मादायाभिमन्त्रितम् ॥
यो विलिम्पति गात्राणि स शूद्रोऽपि विमुच्यते ॥२७॥
कुशपुष्पैर्बिल्वदलैः पुष्पैर्वा गिरिसंभवैः ॥
यो मामर्चयते नित्यं प्रणवेन प्रियो हि सः ॥ २८ ॥
पुष्पं फलं समूलं वा पत्रं सलिलमेव वा ॥
यो दद्यात्प्रणवैर्मह्यं तत्कोटिगुणितं भवेत् ॥ २९ ॥
अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः ॥
यस्यास्त्यध्ययनं नित्यं स मे भक्तः स मे प्रियः ॥३०॥
प्रदोषे यो मम स्थानं गत्वा पूजयते तु माम् ॥
स परां श्रियमाप्नोति पश्चान्मयि विलीयते ॥ ३१ ॥
अष्टम्यां च चतुर्दश्यां पर्वणोरुभयोरपि ॥
भूतिभूषितसर्वांगो यः पूजयति मां निशि ॥ ३२ ॥
कृष्णपक्षे विशेषेण स मे भक्तः स मे प्रियः ॥ ३३ ॥
एकादश्यामुपोष्यैव यः पूजयति मां निशि ॥
सोमवारे विशेषेण स मे भक्तो न नश्यति ॥ ३४ ॥
पञ्चामृतैः स्नापयेद्यः पञ्चगव्येन वा पुनः ॥
पुष्पोदकैः कुशजलैस्तस्मान्नान्यः प्रियो मम ॥ ३५ ॥
पयसा सर्पिषा वापि मधुनेक्षुरसेन वा ॥
पक्वाम्रफलजेनापि नारिकेरजलेन वा ॥ ३६ ॥
गन्धोदकेन वा मां यो रुद्रमन्त्रं समुच्चरन् ॥
अभिषिञ्चेत्ततो नान्यः कश्चित्प्रियतरो मम ॥ ३७ ॥
आदित्याभिमुखो भूत्वा ऊर्ध्वबाहुर्जले स्थितः ॥
मां ध्यायन् रविबिम्बस्थमथर्वांगिरस जपेत् ॥ ३८ ॥

प्रविशेन्मे शरीरेऽसौ गृहं गृहपतिर्यथा ॥
बृहद्रथन्तरं वामदेव्यं देवव्रतानि च ॥ ३९ ॥
तद्योगयाज्यदोहांश्च यो गायति ममाग्रतः ॥
इह श्रियं परां भुक्त्वा मम सायुज्यमाप्नुयात् ॥ ४० ॥
ईशावास्यादि मन्त्रान् यो जपेन्नित्यं ममाग्रतः ॥
मत्सायुज्यमवाप्नोति मम लोके महीयते ॥ ४१ ॥
भक्तियोगो मया प्रोक्त एवं रघुकुलोद्भव ॥
सर्वकामप्रदो मत्तः किमन्यच्छ्रोतुमिच्छसि ॥ ४२ ॥

इति श्रीशिवगीतासु० भक्तियोगो नाम पञ्चदशोऽध्यायः ॥ १५ ॥

॥ श्रीराम उवाच ॥ भगवन्मोक्षमार्गो यस्त्वया सम्यगुदाहृतः ॥
तत्राधिकारिणं ब्रूहि तत्र मे संशयो महान् ॥ १ ॥
श्रीभगवानुवाच ॥ ब्रह्मक्षत्रविशः शूद्राः स्त्रियश्चात्राधिकारिणः ॥
ब्रह्मचारी गृहस्थो वाऽनुपनीतोऽथवा द्विजः ॥ २ ॥
वनस्थो वाऽवनस्थो वा यतिः पाशुपतव्रती ॥
बहुनात्र किमुक्तेन यस्य भक्तिः शिवार्चने ॥ ३ ॥
स एवात्राधिकारी स्यान्नान्यचित्तः कथंचन ॥
जडोऽन्धो बधिरो मूको निःशौचः कर्मवर्जितः ॥ ४ ॥
अज्ञोपहासकाभक्ता भूतिरुद्राक्षधारिणः ॥
लिंगिनो यश्च वा द्वेष्टि ते नैवात्राधिकारिणः ॥ ५ ॥
यो मां गुरुं पाशुपतं व्रतं द्वेष्टि धराधिप ॥
विष्णुं वा न स मुच्येत जन्मकोटिशतैरपि ॥ ६ ॥
अनेककर्मसक्तोऽपि शिवज्ञानविवर्जितः ॥
शिवभक्तिविहीनश्च संसारान्नैव मुच्यते ॥ ७ ॥
आसक्ताः फलरागेण ये त्ववैदिककर्मणि ॥
दृष्टमात्रफलास्ते तु न मुक्तावधिकारिणः ॥ ८ ॥

अविमुक्ते द्वारकायां श्रीशैले पुण्डरीकके ॥
देहान्ते तारकं ब्रह्म लभते मदनुग्रहात् ॥ ९ ॥
यस्य हस्तौ च पादौ च मनश्चैव सुसंयतम् ॥
विद्या तपश्च कीर्तिश्च स तीर्थफलमश्नुते ॥ १० ॥
विप्रस्यानुपनीतस्य विधिरेवमुदाहृतः ॥
नाभिव्याहारयेद्ब्रह्म स्वधानिनयनादृते ॥ ११ ॥
स शूद्रेण समस्तावद्यावद्वेदान्न जायते ॥
नामसंकीर्तने ध्याने सर्व एवाधिकारिणः ॥ १२ ॥
संसारान्मुच्यते जन्तुः शिवतादात्म्यभावनात् ॥
तथा दानं तपो वेदाध्ययनं चान्यकर्म वा ॥
सहस्रांशं तु नार्हन्ति सर्वदा ध्यानकर्मणः ॥ १३ ॥
जातिमाश्रममङ्गानि देशं कालमथापि वा ॥
आसनादीनि कर्माणि ध्यानं नापेक्षते क्वचित् ॥ १४ ॥
गच्छंस्तिष्ठन् जपन्वापि शयानो वान्यकर्मणि ॥
पातकेनापि वा युक्तो ध्यानादेव विमुच्यते ॥ १५ ॥
नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ॥
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥ १६ ॥
आश्चर्ये वा भये शोके क्षुते वा मम नाम यः ॥
व्याजेनापि स्मरेद्यस्तु स याति परमां गतिम् ॥ १७ ॥
महापापैरपि स्पृष्टो देहान्ते यस्तु मां स्मरेत् ॥
पञ्चाक्षरीं वोच्चरति स मुक्तो नात्र संशयः ॥ १८ ॥
विश्वं शिवमयं यस्तु पश्यत्यात्मानमात्मना ॥
तस्य क्षेत्रेषु तीर्थेषु किं कार्यं वान्यकर्मसु ॥ १९ ॥
सर्वेण सर्वदा कार्यं भूतिरुद्राक्षधारणम् ॥
युक्तेनाथाप्ययुक्तेन शिवभक्तिमभीप्सता ॥ २० ॥
नर्यभस्मसमायुक्तो रुद्राक्षान्यस्तु धारयेत् ॥

महापापैरपि स्पृष्टो मुच्यते नात्र संशयः ॥ २१ ॥
अन्यानि शैवकर्माणि करोतु न करोतु वा ॥
शिवनाम जपेद्यस्तु सर्वदा मुच्यते तु सः ॥ २२ ॥
अन्तकाले तु रुद्राक्षान्विभूतिं धारयेत्तु यः ॥
महापापोपपापौघैरपि स्पृष्टो नराधमः ॥ २३ ॥
सर्वथा नोपसर्पन्ति तं जनं यमकिंकराः ॥ २४ ॥
बिल्वमूलमृदा यस्तु शरीरमुपलिम्पति ॥
अन्तकालेऽन्तकजनैः स दूरीक्रियते नरः ॥ २५ ॥
श्रीराम उवाच ॥ भगवन्पूजितः कुत्र कुत्र वा त्वं प्रसीदसि ॥
त ब्रूहि मम जिज्ञासा वर्तते महती विभो ॥ २६ ॥
श्रीभगवानुवाच ॥ मृदा वा गोमयेनापि भस्मना चन्दनेन वा ॥
सिकताभिर्दारुणा वा पाषाणेनापि निर्मिता ॥ २७ ॥
लोहेन वाथ रङ्गेण कांस्यखर्परपित्तलैः ॥
ताम्ररौप्यसुवर्णैर्वा रत्नैर्नानाविधैरपि ॥ २८ ॥
अथवा पारदेनैव कर्पूरेणाथवा कृता ॥
प्रतिमा शिवलिङ्गं वा द्रव्यैरेतैः कृतं तु यत् ॥ २९ ॥
तत्र मां पूजयेत्तेषु फलं कोटिगुणोत्तरम् ॥ ३० ॥
मृदारुकांस्यलोहैश्च पाषाणेनापि निर्मिता ॥
गृहिणा प्रतिमा कार्या शिवं शश्वदभीप्सता ॥
आयुः श्रियं कुलं धर्मं पुत्रानाप्नोति तैः क्रमात् ॥ ३१ ॥
बिल्ववृक्षे तत्फले वा यो मां पूजयते नरः ॥
परां श्रियमिह प्राप्य मम लोके महीयते ॥ ३२ ॥
बिल्ववृक्षं समाश्रित्य यो मन्त्रान्विधिना जपेत् ॥
एकेन दिवसेनैव तत्पुरश्चरणं भवेत् ॥ ३३ ॥
यस्तु बिल्ववने नित्यं कुटीं कृत्वा वसेन्नरः ॥
सर्वे मन्त्राः प्रसिद्ध्यन्ति जपमात्रेण केवलम् ॥ ३४ ॥

पर्वताग्रे नदीतीरे बिल्वमूले शिवालये ॥
अग्निहोत्रे केशवस्य संनिधौ वा जपेत्तु यः ॥ ३५ ॥
नैवास्य विघ्नं कुर्वन्ति दानवा यक्षराक्षसाः ॥
तं न स्पृशंति पापानि शिवसायुज्यमृच्छति ॥ ३६ ॥
स्थण्डिले वा जले वह्नौ वायावाकाश एव वा ॥
गिरौ स्वात्मनि वा यो मां पूजयेत्प्रयतो नरः ॥३७॥
स कृत्स्नं फलमाप्नोति लवमात्रेण राघव ॥
आत्मपूजासमा नास्ति पूजा रघुकुलोद्भव ॥ ३८ ॥
मत्सायुज्यमवाप्नोति चण्डालोऽप्यात्मपूजया ॥
सर्वान्कामानवाप्नोति मनुष्यः कम्बलासने ॥ ३९ ॥
कृष्णाजिने भवेन्मुक्तिर्मोक्षश्रीर्व्याघ्रचर्मणि ॥
कुशासने भवेज्ज्ञानमारोग्यं पत्रनिर्मिते ॥ ४० ॥
पाषाणे दुःखमाप्नोति काष्ठे नानाविधान् गदान् ॥
वस्त्रेण श्रियमाप्नोति भूमौ मन्त्रो न सिद्ध्यति ॥
प्राङ्मुखोदङ्मुखो वापि जपं पूजां समाचरेत् ॥ ४१ ॥
अक्षमालाविधिं वक्ष्ये शृणुष्वावहितो नृप ॥ ४२ ॥
साम्राज्यं स्फाटिके स्यात्तु पुत्रजीवे परां श्रियम् ॥
आत्मज्ञानं कुशग्रन्थौ रुद्राक्षः सर्वकामदः ॥ ४३ ॥
प्रवालैश्च कृता माला सर्वलोकवशप्रदा ॥
मोक्षप्रदा च माला स्यादामलक्याः फलैः कृता ॥४४॥
मुक्ताफलैः कृता माला सर्वविद्याप्रदायिनी ॥
माणिक्यरचिता माला त्रैलोक्यस्य वशंकरी ॥ ४५ ॥
नीलैर्मरकतैर्वापि कृता शत्रुभयप्रदा ॥
सुवर्णरचिता माला दद्याद्वै महतीं श्रियम् ॥ ४६ ॥
तथा रौप्यमयी माला कन्यां यच्छति कामिताम् ॥
उक्तानां सर्वकामानां दायिनी पारदैः कृता ॥ ४७ ॥

अष्टोत्तरशता माला तत्र स्यादुत्तमोत्तमा ॥
शतसंख्योत्तमा माला पञ्चाशन्मध्यमा मता ॥ ४८ ॥
चतुः पञ्चशती यद्वा अधमा सप्तविंशतिः ॥
अधमा पञ्चविंशत्या यदि स्याच्छतनिर्मिता ॥ ४९ ॥
पञ्चाशदक्षराण्यत्रानुलोमप्रतिलोमतः ॥
इत्येवं स्थापयेत्स्पष्टं न कस्मैचित्प्रदर्शयेत् ॥ ५० ॥
वर्णैर्विन्यस्तया यस्तु क्रियते मालया जपः ॥
एकवारेण तस्यैव पुरश्चर्या कृता भवेत् ॥ ५१ ॥
सव्यपार्ष्णिं गुदे स्थाप्य दक्षिणं च ध्वजोपरि ॥
योनिमुद्राबन्ध एष भवेदासनमुत्तमम् ॥ ५२ ॥
योनिमुद्रासने स्थित्वा प्रजपेद्यः समाहितः ॥
यं कंचिदपि वा मन्त्रं तस्य स्युः सर्वसिद्धयः ॥ ५३ ॥
छिन्ना रुद्धाः स्तम्भिताश्च मिलिता मूर्छितास्तथा ॥
सुप्ता मत्ता हीनवीर्या दग्धास्त्रस्तारिपक्षगाः ॥ ५४ ॥
बाला यौवनमत्ताश्च वृद्धा मन्त्राश्च ये मताः ॥
योनिमुद्रासने स्थित्वा मन्त्रानेवंविधान् जपेत् ॥५५॥
तस्य सिद्ध्यन्ति ते मन्त्रा नान्यस्य तु कथंचन ॥
ब्राह्मं मुहूर्तमारभ्यामध्याह्नं प्रजपेन्मनुम् ॥ ५६ ॥
अत ऊर्ध्वं कृते जाप्ये विनाशाय भवेद्ध्रुवम् ॥
पुरश्चर्याविधावेवं सर्वकाम्यफलेष्वपि ॥ ५७ ॥
नित्ये नैमित्तिके वापि तपश्चर्यासु वा पुनः ॥
सर्वदैव जपः कार्यो न दोषस्तत्र कश्चन ॥ ५८ ॥
यस्तु रुद्रं जपेन्नित्यं ध्यायमानो ममाकृतिम् ॥
षडक्षरं वा प्रणवं निष्कामो विजितेन्द्रियः ॥ ५९ ॥
तथाथर्वशिरोमन्त्रं कैवल्यं वा रघूत्तम ॥
स तेनैव च देहेन शिवः संजायते स्वयम् ॥ ६० ॥

अधीते शिवगीतां यो नित्यमेतां जितेन्द्रियः ॥
शृणुयाद्वा स मुक्तः स्यात्संसारान्नात्र संशयः ॥ ६१ ॥
सूत उवाच ॥एवमुक्त्वा महादेवस्तत्रैवान्तरधीयत ॥
रामः कृतार्थमात्मानममन्यत तथैव सः ॥ ६२ ॥
एवं मया समासेन शिवगीता समीरिता ॥
एतां यः प्रजपेन्नित्यं शृणुयाद्वा समाहितः ॥ ६३ ॥
एकाग्रचित्तो यो मर्त्यस्तस्य मुक्तिः करे स्थिता ॥
अतः शृणुध्वं मुनयो नित्यमेतां समाहिताः ॥ ६४ ॥
अनायासेन वो मुक्तिर्भविता नात्र संशयः ॥
कायक्लेशो मनःक्षोभो धनहानिर्न चात्मनः ॥ ६५ ॥
पीडास्ति श्रवणादेव यस्मात्कैवल्यमाप्नुयात् ॥
शिवगीतामतो नित्यं शृणुध्वमृषिसत्तमाः ॥ ६६ ॥
ऋषय ऊचुः ॥ अद्यप्रभृति नः सूत त्वमाचार्यः पिता गुरुः ॥
अविद्यायाः परं पारं यस्मात्तारयितासि नः ॥ ६७ ॥
उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता ॥
तस्मात्सूतात्मज त्वत्तः सत्यं नान्योऽस्ति नो गुरुः॥६८॥
व्यास उवाच ॥ इत्युक्त्वा प्रययुः सर्वे सायंसंध्यामुपासितुम् ॥
स्तुवन्तः सूतपुत्रं ते संतुष्टा गोमतीतटम् ॥ ६९ ॥

॥ इति श्रीशिवगीतासु० गीताधिकारिनिरूपणं नाम षोडशोऽध्यायः ॥१६॥

॥ इति श्रीमच्छिवगीता समाप्ता ॥